Begins on fol. 1(a). The other works herein are :— Jātakapārijātam : fol. 24 (a); Gulikaphalam : fol. 30 (a); Santānadīpikā : fol. 31 (a); Nāmanakṣatramāsanirṇayaḥ : fol. 41 (a); Daśakūṭam : fol. 42(a); Bālāriṣṭādhyāyaḥ : (fol. 53 (a); Madhyamāyuryogaḥ : fol. 55 (a); Pūrṇāyuryogaḥ: fol. 55 (b); Satkarmādi : fol. 57 (a); Śatamañjarīyogaḥ : fol. 57 (b); Daśābhuktiḥ: fol. 75(a); Navagrahasamayaḥ : fol. 92(a); Dvādaśabhāvaphalam : fol. 99(a); Nakṣatranighaṇṭuḥ : fol. 106 (a); Rāśinighaṇṭuḥ : fol. 107 (b); Grahanighaṇṭu ḥ: fol. 108 (b); Lagnanighaṇṭuḥ : fol. 109 (b); Sthānanighaṇṭuḥ : fol. 110(a); Lagnanighaṇṭuḥ : fol. 112 (a); Uccanīcabhāvaḥ : fol. 114 (a); Jyautiṣaviṣayaḥ : fol. 115 (a); Rāmacakram : fol. 159 (b); Prasavasūtram : fol. 163 (a); Dvādaśabhāvaphalam : fol. 171 (a); Jyautiṣam : fol. 244 (a).

The Text is the same sa that described under R. No. 374(c).

Complete.

R. No. 8022.

जातकपारिजातम् by वैद्यनाथ

JĀTAKAPĀRIJĀTAM by Vaidyanātha

Foll. 24 (*a*)—29 (*b*) ; 70 granthas.

Begins on fol. 24 (*a*) of the manuscript described under the previous number.

Same work as that described under R. No. 1592.

Contains a portion of the 8th chapter.

R. No. 8023.

गुलिकफलम् ।

GULIKAPHALAM

Fol. 30 (a)—30 (b) ; 12 granthas.

Begins on fol. 30 (a) of the manuscript described under R. No. 8021.

Gulika is a demon said to be the son of Saturn and is much dreaded in certain hours as causing, by its various planetary positions, fatal results which are explained here.

Incomplete.

Beginning :

व्याधितो मृतिको वापि क्रुद्धको ज्ञानवल्लभः ।
क्षताङ्गो व्रणसन्तापो गुलिके लग्नसंस्थिते ॥
विवेकहीनः क्रोधी च निस्सही निन्द्यवाचकः ।
स्वतन्त्रो लोकविद्वेषी गुलिके धनसंस्थिते ॥

End :

कुनखी विकलाङ्गश्च नीचवृत्तिपराश्रितः ।
दुःस्वप्नभयमुद्भाव्येत् द्वादशे मान्दिसंस्थिते ॥

R. No. 8024.

सन्तानदीपिका
SANTĀNADĪPIKĀ

Foll. 31 (a)–40 (b) ; 150 granthas.

Begins on fol. 31 (a) of the manuscript described under R. No. 8021.

Same work as that described under D. No. 17370 with slightly different readings in the end.

Incomplete.

Beginning :

गुरुनाथं नमस्कृत्य गणनाथं प्रणम्य च ।
वाग्देवीवन्दनं कृत्वा सन्तोष्य कमलोद्भवम् ॥
शङ्करं विष्णुमभ्यर्च्य सम्पूज्य च नवग्रहान् ।
वासुदेवं गुरुं ध्यात्वा वक्ष्ये सन्तानदीपिकाम् ॥
वराहहोरामालोक्य तथा जातकपद्धतिम् ।
सारावलीं तथा दृष्ट्वा पराशरमतं तथा ॥
प्रश्नशास्त्राणि चान्यानि समालोक्य मुहुर्मुहुः ।
ततस्सारं समुध्दृत्य वक्ष्ये सन्तानदीपिकाम् ॥
अज्ञानामल्पबुद्धीनां हितार्थं वक्ष्यते मया ।
सन्तानदीपिकाशास्त्रमुपदेशोऽर्थदर्शनात् ॥

End :

गगने शुभसंयुक्ते कर्मसिद्धिं वदेद्बुधः ।
लाभेशे परमोच्चस्थे शुभमध्यगतेऽथवा ॥
लाभे सौम्यग्रहैर्दृष्टे बहुलाभं वदेद्बुधः ।
व्ययेशे रन्ध्रगे षष्ठे रन्ध्रेशे व्ययसंस्थिते ॥
धनधान्यसमृद्धिः स्यात् प्रवदेन्मतिमान्नरः ।
सन्तानदीपिकाशास्त्रं एकविंशोत्तरं शतम् ॥
हृद्यैः पद्यैश्च यत्प्रोक्तं तत्सर्वैः परिगृह्यते ॥

R. No. 8025.

नामनक्षत्रमासनिर्णयः

NĀMANAKṢATRAMĀSANIRṆAYAḤ

Fol. 41 (a) and (b) ; 10 granthas.

Begins on fol. 41 (a) of the manuscript described under R. No. 8021.

Same work as that described under D. No. 13814.

Complete.

The scribe adds :—

कृष्णो हृष्णो(?)श्रीधरः क्षेत्रपालो
ज्ञानो भीमो भैरवश्चेति नाम्नाम् ।
स्वाती सर्प त्वाष्ट्र मूलाश्वि ज्येष्ठा
पूर्वाषाढा (निर्ऋ)[इति]ऋक्षाणि सप्त ॥

Fol. 41(b) ; Explains the meaning of the above verse in Tamil.

R. No. 8026.

दशकूटम् (द्वादशकूटम्) — द्राविडटीकासहितम् ।

DAŚAKŪṬAM (DVĀDAŚAKŪṬAM) with Tamil meaning

Foll. 42 (a)–53(a) ; 148 granthas.

Begins on fol. 42 (a) of the manuscript described under R. No. 8021.

Same work as that described under D. No. 13572.

Complete.

R. No. 8027.

बालारिष्टाध्यायः

BĀLARIṢṬĀDHYĀYAḤ

Foll. 53 (*a*)—55 (*a*) ; 28 granthas.

Begins on fol. 53 (*a*) of the manuscript described under R. No. 8021.

Similar to the work described under D. No. 13831.

This seems to be a portion of the work described under D. No. 13697.

Incomplete.

Beginning :

सुतमदनवमान्त्यलग्नरन्ध्रेष्वशुभयुतो मरणाय शीतरश्मिः ।
यदि शुभसहि(ते)[तः]चिरायुरस्याः प्रभवति य(द्धि)[दि]वीक्षितो युतो [वा ॥
होरेशे पापसंयुक्ते लग्ने मान्दिसमन्विते ।
पापयुक्तेऽष्टमे षष्ठे व्ययचन्द्रे मृतिं वदेत् ॥
लग्ने राहुसमायुक्ते मन्दभौमनिरीक्षिते ।
लग्नांशे मन्दसूनुश्चेत् जातश्च यमलो भवेत् ॥
रविश्च रविपुत्रश्च भूमिपुत्रश्च केन्द्रके ।
दशाहं दशमासं वा दशवर्षमथापि वा ॥

End :

शनिर्मङ्गलचन्द्रार्करन्ध्रकोणत्रिकोणगे ? ।
शुभग्रहं न पश्यन्ती अल्पायुर्भवति ध्रुवम् ? ॥
द्वादशाष्टमलग्नेषु पापयुक्तो भवेच्छशी ।
केन्द्रस्थानं गते राहौ अल्पायुर्भवति ध्रुवम् ॥

R. No. 8028.

मध्यमायुर्योगः
MADHYAMĀYURYOGAḤ

Fol. 55 (*a*)—55 (*b*) 8 granthas.

Begins on fol. 55(a) of the manuscript described under R. No. 8021.

This also seems to be a portion of the work described under D. No. 13697.

This work explains the method of finding out the duration of a person's life which is neither short nor long, from the position of planets at the time of his birth.

Complete.

Beginning :

शुभग्रहात् त्रिकोणस्थं ? केन्द्रे पापसमन्विते ।
लग्नेशो दुर्बलो यस्य मध्यायुर्भवति ध्रुवम् ॥
केन्द्रस्थाने शुभास्सर्वे पापजन्माष्टरिप्फगे ।
लग्नेशे नीचराशिस्थे मध्यायुर्भवति ध्रुवम् ॥

End :

लग्नेशे नीचराशिस्थे लग्ने भृगुसमन्विते ।
रविराहुस्थिते रन्ध्रे मध्यायुर्भवति ध्रुवम् ॥

R. No. 8029.

पूर्णायुर्योगः
PŪRṆĀYURYOGAḤ

Foll. 55 (b)–56 (b) ; 20 granthas.

Begins on fol. 55(b) of the manuscript described under R. No. 8021.

Similar to the work described under the previous number but dealing with the planetary positions of a person whose life is long.

This also seems to be a portion of the work described under D. No. 13697.

Complete.

Beginning :

पूर्णायुः—

लग्नात् पञ्चमसप्तमे च नवमे उच्चस्थितो वाक्पतिः
स्वद्रेक्काणनवांशभागवलिभिः परमोच्चभागे सति ? ।
शुक्रज्ञा विलग्ननाथसहितो केन्द्रत्रिको राशिगे ?
जातः पूर्णशतायुः पुण्यजननं चक्रोधरो भूपतिः ? ॥

End :

तृतीयस्थानगे जीवे भृगुचन्द्रस्तथा कुजः ।
सदाद्भिोग्यसम्भाग्यं पुत्रवान् जनवान् भवेत् ॥

R. No. 8030.

सत्कर्मादि
SATKARMĀDI

Fol. 57(a)-57(b) ; 15 granthas.

Begins on fol. 57 (a) of the manuscript described under R. No. 8021.

This consists of only two Yogas, viz., Satkarmayoga and Duṣkarmayoga ; explaining the combinations of stars and their good and bad effects on persons.

Similar to the work described under D. No. 13697.

Complete.

Beginning :

पूर्णचन्द्रस्थिते धर्मे गुरुसंयुतवीक्षिते ।
धर्मपदो भवेत् सत्वं योगो सत्कर्मसंज्ञकः ? ॥
धर्मेशे कर्मराशिस्थे गुरुणा यदि वीक्षिते ।
कर्मवन्तो भवेत् सत्वं योगस्सत्कर्मसंज्ञकः ? ॥

End :

(गुरूचन्द्रौ) [गुरौ चन्द्रे] स्थिते कर्मे लग्नेशेन समन्विते ।
नीचोंऽशे गुरुकर्मस्थे कुजराहुसमन्विते ? ॥
बहूहावरते नित्यं योगो दुष्कर्मसंज्ञकः ? ॥

R. No. 8031.

शतमञ्जरीयोगः

ŚATAMAÑJARĪYOGAḤ

Foll. 57 (b)—74 (b) ; 210 granthas.

Begins on fol. 57 (b) of the manuscript described under R. No. 8021.

Similar to the work described under R. No. 3534 (*b*).

Incomplete.

Beginning :

रिप्फषष्ठाष्टमे नीचे कर्मेशे भूमिजे युते ।
शनिराहुयुते दृष्टे सुरापानी भवेन्नरः ॥
गुरुराहुयुते नीचे धनराशिसमन्विते ।
मन्दभौमेन सन्दृष्टे ब्रह्मघाती भवेन्नरः ॥
कर्मेशे नीचदुश्चिक्ये ज्ञानेशे राहुसंयुते ।
कुजमन्दांशके चन्द्रे गुरुदारं गतो नरः ॥

End :

सुतेशे परमोच्चस्थे लग्नेशेन समन्विते ।
ज्ञानवन्तं सुतप्राप्ति ? योगः सन्तानसंज्ञकः ॥
(योगो सन्तानगो) [योगे सन्तानके] जातः सुतभाग्यसमन्वितः ।
धर्मशीलो महाभोगी पुत्रवान् भवति ध्रुवम् ॥

R. No. 8032.

दशाभुक्तिः
DAŚĀBHUKTIḤ

Foll. 75 (*a*)–91 (*b*) ; 190 granthas.

Begins on fol. 75 (a) of the manuscript described under R. No. 8021.

Similar to the work described under R. No. 2454(a).

Incomplete.

R. No. 8033.

नवग्रहसमयः—द्राविडव्याख्यासहितः
NAVAGRAHASAMAYAḤ with Tamil meaning

Foll. 92 (*a*)—98 (*b*) 84 granthas.

Begins on fol. 92 (a) of the manuscript described under R. No. 8021.

Similar to the work described under D. No. 13812.

Incomplete.

Beginning :

अतः परं प्रवक्ष्यामि समयानां विलोमिताम् ।
सुखदुःखं विनिश्चित्य शास्त्रयुक्तफलं भवेत् ॥

End :

भूम्यादिसस्यवृद्धिश्च राजसेनाधनप्रियः ।
ब्रह्मद्वेषी शत्रुयुक्तः पुराणश्रवणो सुख ? ॥

R. No. 8034.

द्वादशभावफलम्
DVĀDAŚABHĀVAPHALAM

Foll. 99 (a)–105(a) ; 75 granthas.

Begins on fol. 99 (a) of the manuscript described under R. No. 8021.

Similar to the work described under D. No. 13782.

Incomplete.

Beginning :

लग्नाधिपः षष्ठाष्टमव्ययेषु स्थितश्चेत् न देहसौख्यम्। षष्ठपगतस्थितश्चेत् तदेव फलम्। देहसौख्यं नास्तीत्यर्थः। लग्ने पापः, तदधिपो बलहीनः, सदा व्याधिमान्। बलहीनोऽपि केन्द्रत्रिकोणस्थितश्चेत् व्याधिमान् भवति।

End :

कुजशुक्रौ सहाष्टमस्थे ब्रह्महत्या भवति ?।
कुजश्शनो सहाष्टमस्थे शिरश्छेदं भवति ?।
चन्द्रोऽष्टमश्चेत् गजाद्भयम्॥

R. No. 8035.

नक्षत्रनिघण्टुः

NAKṢATRANIGHAṆṬUḤ

Foll. 106 (a)–107(b) ; 20 granthas.

Begins on fol. 106 (*a*) of the manuscript described under R. No. 8021.

Same work as that described under D. No. 13797.

Complete.

R. No. 8035(a).

राशिनिघण्टुः

RĀŚINIGHAṆṬUḤ

Foll. 107 (b)—108 (b) ; 6 granthas.

Begins on fol. 107 (b) of the manuscript described under R. No. 8021.

Same work as that described under D. No. 13886.

Complete.

R. No. 8035(b).

ग्रहनिघण्टुः

GRAHANIGHAṆṬUḤ

Foll. 108 (b)–109 (b) ; 12 granthas.

Begins on fol. 108 (b) of the manuscript described under R. No. 8021.

Same work as that described under D. No. 13656.

Complete.

R. No. 8035(c).

लग्ननिघण्टुः

LAGNANIGHAṆṬUḤ

Foll. 109 (b)—110 (a); 7 granthas.

Begins on fol. 109 (b) of the manuscript described under R. No. 8021.

Similar to the work described under D. No. 13895.

Complete.

Beginning:

कल्यो देहो विलग्नश्च लग्नं होरोदयस्तनुः ।
मूर्तिः शरीरमात्मा च भावेयं प्रथमं ग्रहे ? ॥
द्वितीयं नेत्रवित्तं च वाक्कुटुम्बं धनं तथा ।
तृतीयो विक्रमो भ्राता दुश्चिक्यं सहजं तथा ॥

End:

एकादशं भवेल्लाभं आस्थानश्चोभयं तथा ।
द्वादशश्च व्ययं रिप्फं पग्रहश्चाभिधीयते ॥

R. No. 8035(d).

स्थाननिघण्टुः

STHĀNANIGHAṆṬUḤ

Foll. 110 (a)–111(b); 25 granthas.

Begins on fol. 110 (a) of the manuscript described under R. No. 8021.

Same work as that described under D. No. 13896, but with a slight difference in the end.

Complete.

Beginning :

लग्नं चि(न्धा) [न्ता] मूर्तिकीर्तिरङ्गोपाङ्गनिरूपणम् ।
स्थितिः शरीरसंपत्तिर्जन्मलग्नपतेः फलम् ॥ १ ॥
वित्तं नेत्रं वाक् कुटुम्बं सत्यं सम्भोगमेव च ।
विद्या वेश्म प्रयाणञ्च द्वितीयाधिपतेः फलम् ॥ २ ॥

Colophon :

स्थाननिघण्टुः ।

End :

अथ व्ययं तथालाभं गृहनाशभयं तथा ।
देशान्तरप्रयाणञ्च द्वादशाधिपतेः फलम् ॥ २४ ॥
अतिचारश्च वक्रश्च पूर्वराशिगतेः फलम् ? ।
बृहस्पतौ च तत्रास्ति तत्तद्राशिगतेः फलम् ॥ २५ ॥

R. No. 8035(e).

लग्ननिघण्टुः
LAGNANIGHAṆṬUḤ

Foll. 112 (a)–114 (a) ; 15 granthas.

Begins on fol. 112 (a) of the manuscript described under R. No. 8021.

Similar to the work discribed under R. No. 8035(c).

Complete.

Beginning :

लग्नं होरा तनुः मूर्तिः उदयः शिरः कीर्तिः शरीरं कल्यं विलग्नं आत्मजः चिन्ता अङ्गं रूपम् ।

End :

व्ययं अशुभं विनाशं द्वादशं रिप्फस्थानं स्थाननाशं प्रग्रहं भयं देशान्तरप्रयाणम् ॥ २०२ (१२)

R. No. 8036.

उच्चनीचभावः—द्राविडव्याख्यासहितः

UCCANĪCABHĀVAḤ with Tamil meaning

Foll. 114 (a)–115 (a) ; 12 granthas.

Begins on fol. 114 (a) of the manuscript described under R. No. 8021.

Complete.

The superiority and inferiority of the nine planets according to their position in the zodiac are explained here.

Beginning :

अजवृषभमृगाङ्गनाकुलीरं झषजूकदिवाकरादितुङ्गः।

என்பது: மேஷத்தில் ரவி, விருஷபத்தில் சந்திரன், மகரத்தில் குஜன், கன்னியில் புதன், கடகத்தில் குரு, மீனத்தில் சுக்ரன், துலாத்தில் சனி, இந்த ஸ்தானம் ஏழு கிரகங்களுக்கு உச்சம். உச்ச(த்துக்கு) [த்திற்கு] 7 மிடம் நீசம்.

End :

राहोश्च युग्मं घटकं त्रिकोणं कन्या गृहं भास्करसौरिमित्रम्।

केतोश्च चापस्तु हरित्रिकोणं मीना(नं) गृहं शुक्रशनि प्रवक्ष्यम्? ॥

எ-து-. ராஹுவுக்கு மிதுனம் உச்சம், கும்பம் த்ரிகோணம், கன்னி ஸ்வக்ஷேத்ரம், ரவிசனி, மித்ரா(ள்)[ர்கள்]. கேதுவுக்கு தனுஸ்ஸு உச்சம் ஸிம்ஹம் த்ரிகோணம், மீனம் ஸ்வக்ஷேத்ரம் சுக்ரன் சனி சத்ரு.

R. No. 8036(a).

ज्यौतिषविषयः—द्राविडटीकासहितः

JYAUTIṢAVIṢAYAḤ with Tamil meaning

Foll. 115 (a)–159 (a) ; 650 granthas-

Begins on fol. 115 (a) of the manuscript described under R. No. 8021.

Similar to the work described under D. No. 13425.

Incomplete.

The topics dealt with herein are :

Fol.	
115.	राहुकेत्वोः शत्रुमित्रभावः ।
116.	नवग्रहाणां अरिमित्रस्थानम् ।
117.	नवग्रहदृष्टिः ।
118.	गोचारफलम् ।
119.	यात्रानक्षत्राणि ।
120.	नक्षत्रशूलदोषः ।
,,	योगवर्ज्यम् ।
,,	वारशूलदोषः ।
,,	यात्रातिथयः ।
121.	तिथिशूलदोषः ।
,,	यात्राराशिः ।
122.	राशिशूलदोषः ।
,,	ग्रहावस्था (बाल्यादिः)-ग्रहवर्णः ।
123.	योगिनी ।
124.	पञ्चकदोषः ।
,,	दशयोगम् ।
,,	ग्रहराशिसञ्चारकालप्रमाणम् ।
,,	गोचरपूर्वदृष्टिः ।
125.	गुरुफलम् ।
126.	शकटयोगः ।
127.	कारकस्वरूपम् ।
130.	पुंस्त्रीप्रजानिश्चयः ।
,,	चरस्थिरोभयराशिः ।
,,	षड्वर्गफलम् ।
131.	होरा ।
,,	होराफलम् ।
131.	द्रेक्काणम् ।
133.	नवांशम् ।
134.	द्वादशांशम् ।
135.	त्रिंशांशम् ।
,,	अंशलग्नकल्पनाप्रकारः ।
136.	पुंस्त्रीप्रजानिर्णयः (गर्भे) ।
137.	मन्त्रशालावलिः (सचक्रम्) ।
138.	ओजराशिः ।
,,	युग्मराशिः ।
,,	धातुमूलजीवराशिः ।
,,	राशिवर्णः ।
,,	शकुनम् ।
139.	क्षौरकर्म ।
,,	आयुर्भावः (ब्रह्मादिकीटपर्यन्तः)।
140.	नित्यग्रहफलम् ।
141.	रविफलम् ।
142.	मासभुक्तिफलम् ।
144.	वर्षफलम् (वत्सरस्य) ।
,,	ग्रहफलम् ।
146.	ग्रहवेला (कालः) ।
147.	गृहप्रवेशदिनम् ।
,,	ऊर्ध्वमुखाधोमुखनक्षत्रम् ।
,,	अतमृतादियोगाः ।
150.	ग्रहोच्चभङ्गः ।
150.	ग्रहनीचभङ्गः ।

Fol.		Fol.	
151.	कटपयादिसंख्या ।	152.	आकाशपातालम् ।
,,	होरा ।	153.	मार्गशकुनम् ।
,,	विषनाडी ।	,,	வழிச்சகுனம்
		155.	காகமேருந்திசை
152.	वारशूलदोषः ।	,,	ராகுகாலம்
,,	पुंस्त्रीनपुंसकनक्षत्राणि ।	,,	गृहारम्भलग्नम् ।
,,	दिनचन्द्रः ।	163.	कन्यार्तुफलम् ।

Beginning :

रविराहू परं वैरं मन्दकेतू महद्भयम् ।
केतुश्चन्द्रस्सदा वैरं राहुर्मङ्गलमेव च ॥

राहुश्शुक्रो रविः केतुर्मित्रो दूरं सुहृत्तदा ? ।
केतुश्शुक्रः सदा वैरं राहुर्मङ्गलमित्रतः ॥

बृहस्प(ती)ते राहुसुहृत् शत्रू केतुबृहस्पती ।
राहुशनिरवि(?) मित्राणि शत्रुः केतुर्बुधस्तथा ॥

मेषादयस्तु चत्वारः सुहृत् श्रीकर्किणी मृतिः ।
चापसिंहमृगः कुम्भः मीनमेषार्ककेतुमान् ॥

End :

तुलायां सलक्षणश्चैव (?)वृश्चिके व्यभिचारिणी ।
दुश्चरित्रा धनुःपूर्वे अपरे तु पतिव्रता ॥

मकरे मानहानिः स्यात् कुम्भे धनपतिर्भवेत् ।
मीने पुत्रवती नारी इत्येतदृतुलक्षणम् ॥

வெறும் வயிற்றிலே கண்டால் நன்றாக வாழ்ந்துகொண்டிருப்பள். சாப்பிட்டபிற்பாடு கண்டால் கிலேசப்படுவள்.

R. No. 8037.

रामचक्रम्

RĀMACAKRAM

Fol. 159 (b) ; 10 granthas.

Begins on fol. 159 (b) of the manuscript described under R. No. 8021.

Similar to the work described under D. No. 8056.

Complete.

Beginning :

नवषोडशबाणविरिञ्चिमुखं गिरिलोचनरुद्रमनुप्रयुतम् ।
रवि विश्वभुग(क्र)[ङ्ग]ल शं(पु)[भु]पदं रस राम दरा पक्ष चक्रम् । ?

End :

इन्द्र(तनयश्च)[सूनुश्च] कल्याणं (दीर्घमायुष्यं)[दीर्घायुष्यं] तु जाम्बवान् ।
सर्वलाभो हनूमन्तं गुहेन प्रियदर्शनम् ॥
नारदं कलहश्चैव कार्यनाशश्च शूलिनी ।
रामपट्टाभिषेकश्च सर्वकार्येषु सिद्धये ॥

Fol. 160 (a) contains Praśnas (astrological) and Ezhuttāṇilakṣaṇam in Tamil. Foll. 160 (b)–162 (a) contain the Pallivizhundapalan in Tamil. 162(b) is blank.

R. No. 8038.

ज्यौतिषविषयः

JYAUTIṢAVIṢAYAḤ

Foll. 163 (a)–168 (b).

Begins on fol. 163 (a) of the manuscript described under R. No. 8021.

This work is a portion of an astrological work dealing with the good and evil likely to happen to ladies, according to their horoscope.

The subjects dealt with herein are :—

Prasavasūtram and Nālaveṣṭitam : Fol. 163 (a) ; fol. 163 (b) is blank. Māsavākyam: Foll. 164 (a)–166 (a). Kalatranirṇayaḥ with

Tamil-meaning: foll. 166 (a)–167 (a) ; Ṛtusnātabhāryāsamyoga-phalam with Tamil-meaning: fol. 167 (b); Kujadoṣaḥ: foll. 167 (b)–168 (a); Kujadoṣabhaṅgaḥ and Āyurnirṇayaḥ with Tamil meaning : fol. 168 (a–b).

Incomplete.

Beginning :

लग्नादिपूर्वषट्कस्थाः यत्संख्या राशयः स्थिताः ।
तत्संख्या राशयः प्रोक्ताः क्रूरैः क्रूरैः शुभावहैः ॥
शुभग्रहे च माङ्गल्ये पापस्थे विधवा भवेत् ।
राहुस्थे वृद्धनारी च केतुस्थे विधवा भवेत् ॥

Foll. 169 (a)–170 (a) contain Karaṇam pārpatu in Tamil.

Fol. 170 (b) contains Piḍukāl in Tamil,

R. No. 8039.

द्वादशभावफलम्
DVĀDAŚABHĀVAPHALAM

Foll. 171 (a)–243 (a); 925 granthas.

Begins on fol. 171 (a) of the manuscript described under R. No. 8021.

Foll. 207(b), 218(b), 225(b), 229(b), 235(b), 239(b), 241(b) and 243(b) are blank.

Similar to the work described under D. No. 13782.

Complete.

Beginning :

லக்னாதி த்வாதச பாவங்களுக்குச்சமுதாய பலன்.

जन्मकाले तु दैवज्ञो लग्नं निश्चित्य तत्त्वतः ।
तस्मिन् काले खेचराणां चारं ज्ञात्वा फलं वदेत् ॥ १ ॥
पूर्वमायुः परीक्षेत पश्चात् लक्षणमादिशेत् ।
नो चेत्तल्लक्षणं ज्ञानमायुषो भवति ध्रुवम् ॥ २ ॥
भावप्रवृत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेन ।
भावक्रमादाम(?)विनाशकाले फलस्य नाशं कथयन्ति तज्ज्ञाः ॥ ३ ॥

लग्नाद्द्वादशभावानां तत्तत्संज्ञा प्रकीर्तिता ।
तेषां मध्ये पञ्च भावा दुःखदा इति कथ्यते ॥ ४ ॥
लाभं तृतीयं रन्ध्रञ्च शत्रुस्थानं व्ययं तथा ।
एतद्योगे तु यो भावः स नाशं प्राप्नुयाद्ध्रुवम् ॥ ५ ॥
चत्वारो राशयो भद्रं केन्द्रकोणशुभावहाः ।
तेषां संयोगमात्रेण अशुभोऽपि शुभावहः ॥ ६ ॥
केन्द्राश्चतस्रो विख्याता ऋषिभिः परिकीर्तिताः ।
तेषां मध्ये[च] शुभदौ कर्मबन्धूपसंज्ञकौ ॥ ७ ॥
तावेतौ योगकर्तारौ तेषां तु फलभागिनौ ।
लक्ष्मीस्थानं त्रिकोणं स्यात् विष्णुस्थानं तु केन्द्रकम् ॥ ८ ॥
तेषां संयोगमात्रेण चक्रवर्ती नृपो भवेत् ।
चन्द्रलग्नाधिपो यत्र तत्त्रिकोणमथापि वा ॥ ९ ॥
तत्सप्त(मित्र) [मत्रि]कोणं वा यथालग्नं तु निश्चयम् ।
आदित्यादिग्रहास्सप्त ये ये भावाधिपाः स्मृताः ॥ ॥ १० ॥
राहुकेत्वोस्तु तन्नास्ति संयोगेन फलं तथा ।
छायाग्रहौ राहुकेतू शुभयोगे शुभप्रदौ ॥
पापयोगे पापि (स्यात) [नौ तु] इति शास्त्रविनिश्चयः ॥ ११ ॥

Colophon :

इति लग्नादिद्वादशभावानां समुदायफलम् ॥
अथ लग्नभावफलम् :—
शरीरवर्णाकृतिलक्षणानि यशोगुणस्थानसुखासुखानि ।
प्र(पा.....चेजो)[तापतेजो]बलदुर्बलानि फलानि लग्नस्य वदन्ति
सन्तः ॥ २० ॥

End :

भानुर्वा कृशशीतगुर्व्ययगतो वित्तस्य नाशो नृपैः
भौमो नाशयतीन्दुजेक्षितयुतो नानाप्रकारैर्धनम् ।
वागीशेन्दुसुतौ यदि व्ययगतौ वित्तस्य संरक्षकौ
सौम्यश्शुक्रयुतो भवेद्यदि नृणां शय्यासुखं जायते ॥

R. No. 8040.

ज्यौतिषम् (சோதிடம்) in Tamil.

Foll. 244(a)-269(a); 263(b) and 266(b) are blank.

See the Tamil part of this catalogue for its description.

Fol. 269(b) contains Dharmaśāstravacanas. Fol. 270(a) gives the names of the works contained in the manuscript R. No. 8021. Foll. 271(a)-272(b) and 274 contain Navagrahaśatrumitrabhāva. Fol. 272(a) contains an unintelligible stanza running thus: मा मा सोमारि रम्भा समसुसिसम च रामसीसं ममाङ्कः; Fol. 273 (a) contains Jātakacandrikā, Kārakavivaraṇam and Ekādaśabhāvaḥ; Fol. 273 (b) is blank. Fol. 275(a) contains the index of the work of Dvādaśabhāva; Foll. 275(b) and 280 are blank.

(R. Nos. 8041-8043 in one volume)

Palm leaf; 27 x 4.7 c.m; Foll. 201; Lines: 10-12 in a page; Grantha; Injured.

Presented in 1948-49 by Sri Mṛdaṅgam Subbaiyer, Chattapuram village, Kalpathi, Palghat.

R. No. 8041.

परिभाषालक्षणम् by **वररुचि**

PARIBHĀṢĀLAKṢAṆAM by Vararuci

Foll. 129(a)-136 (a); 200 granthas.

Begins on fol. 129(a). The other works herein are :—

Sāmavedagānam (Prakṛti): fol. 2 (a); Chāndogyopaniṣat fol. 137 (a); Sāmavedasamhitā (Ṛkpāṭhaḥ): fol. 177 (a).

Fol. 136 (b) contains Sandhyāvandanakālaviṣayamantraḥ.

Same work as that described under D. No. 1007 (entitled Paribhāṣā) but with slightly different readings. The author's name is found in the colophon at the end.

Complete.

Beginning:

सप्तस्वरैस्समस्तं यो जगदेतच्चराचरम् ।

सञ्जीवयति विश्वात्मा स नो विष्णुः प्रसीदतु ॥

अथ साम्नां क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रअतिस्वारपरिस्वारवतां पर्वणां ज्ञापकत्वेन परिभाषितैः ककारादिभिरक्षरैः पर्वादिवर्णैश्च साम्नां

दीपस्थानीयो ग्रन्थ आरभ्यते। यत्र सामगा विरम्य विरम्य गायन्ति, तत्रविरते सामभागे पर्वसंज्ञा वर्तते। पर्व द्विविधम्, एकस्वरमनेकस्वरञ्चेति। "ओ म्रा इ" इत्याद्येकस्वरं, चतुर्थस्वरमात्रवृत्तित्वात्। आम्र आं यां ह्री वी इत्याद्यनेकस्वरम्।

End :

अङ्गुष्ठं क्रुष्टस्य, तर्जनीमूलरेखा प्रथमस्वरस्य, तद्द्वितीया द्वितीयस्वरस्य, मध्यमामध्यरेखा तृतीयस्वरस्य, अनामिकामध्यमरेख्यश्चतुर्थस्वरस्य,(?) तन्मूलरेखा मन्द्रस्वरस्य, कनिष्ठिकामूलरेखा अतिस्वार्यस्य, उत्तमरेखा, संप्रधारणम्, एवं सप्तस्वराणां स्थानान्युक्तानि॥

Colophon :

इति वररुचिकृतं परिभाषालक्षणं सम्पूर्णम्॥

R. No. 8041(a).

सामवेदगानम् (प्रकृतिः)
SĀMAVEDAGĀNAM (PRAKṚTIḤ)

Foll. 2 (a)–129 (a); 4,225 granthas.

Begins on fol. 2 (a) of the manuscript described under the previous number.

Same work as that described under D. No. 47.

Complete.

R. No. 8042.

छान्दोग्योपनिषत्
CHĀNDOGYOPANIṢAT

Foll. 137 (a)–177 (a); 960 granthas.

Begins on fol. 137 (a) of the manuscript described under R. No. 8041.

Much injured. Fol. 158(b); is blank.

Same work as that described under D. No. 451.

Complete.

R. No. 8043.

सामवेदसंहिता (ऋक्पाठः)

SĀMAVEDASAMHITĀ (ṚKPĀṬHAḤ)

Foll. 177 (a)–199(a); 760 granthas.

Begins on fol. 177 (a) of the manuscript described under R. No. 8041

Same work as that described under D. No. 41.

Foll. 183 (b) and 188 (b) are blank.

Fol. 199 (b). contains a portion of Prakṛti] Ṛkchalākṣaram. Fol. 200 gives a list of some books. Fol. 201 is blank.

This work contains. Āgneyaparva, Āruṇam and Mahānāmnī.

(R. Nos. 8044–8077 in one volume)

Palm leaf; 15.9 x 4.7 c.m; Foll. 144; Lines: 11–15 in a page; Grantha; good.

Presented in 1948–49 by Mṛdaṅgam Subbaiyer, Chattapuram village, Kalpathi, Palghat.

R. No. 8044.

रामायणसङ्ग्रहः

RĀMĀYAṆASAṄGRAHAḤ

Foll. 5(a)–9(b); 75 granthas.

Begins on fol. 5(a). Foll. 1–4 are blank.

The other works herein are :—

Rāmastotram : fol. 10 (a); Rāmamānasapūjā : fol. 11 (a); Rāmastavarājaḥ : fol. 15(a); Rāmahṛdayam : fol. 20(a); Rāmakavacam : fol. 23(a); Gāyatrīrāmāyaṇam : fol. 27(a); Ādityahṛdayam : fol. 29(a); Pañcāyudhastotram : fol. 32(a); Dvādaśanāmastotram : fol. 33(b); Lakṣmīdvādaśanāmastotram : fol. 34(b); Garuḍadvādaśanāmastotram : fol. 35(a); Rāmāyaṇaślokāḥ : fol. 36(a); Rāmamaṅgalam; fol. 37(a); Mārkaṇḍeyastotram : fol. 39(a); Śivastavaḥ : fol. 40(a); Akṣaramālikā : fol. 41(b); Bhāratasāvitrī : fol. 45(a); Indrākṣīstotram : fol. 52(b); Śivakavacaḥ : fol. 56(b); Nadīstotram : fol. 63(b); Gaṅgāstotram : fol. 65(a); Rāmakṛṣṇaśivastotram: fol. 67(b); Mahālakṣmīstotram : fol. 70(a); Śarabheśvaramantraḥ : fol. 73 (a); Śarabhamālāmantraḥ : fol. 74(a); Śarabhapūjā : fol. 78(b); Homayantravidhiḥ : fol. 79(a); Śūlinīdigbandhanamantraḥ : fol.

83(a); Yantrapratiṣṭhā: fol. 87(a); Śūlinīmālāmantraḥ: fol. 90(a); Śūlinyākarṣaṇamantraḥ: fol. 92(a); Vaidyaviṣayaḥ: fol. 95(b); Svarṇākarṣaṇabhairavamantraḥ: fol. 99(a); Atharvaṇa-bhadrakālīmantraḥ: fol. 100(a); Bhāṣāmantraḥ: fol. 101 (a); Aṣṭavarga with Tamil meaning: fol. 111(a) and Anabhāyogaphalam: Fol. 130(a).

Similar to the work described under D. No. 1904, determining the date of birth etc. of Rāma.

Complete.

Beginning:

श्रीरामजन्मप्रभृति वर्षमासदिनानि च ।
रामायणप्रकारेण सर्वं निरवशेषतः ॥
श्रीरामायणसारस्य सङ्ग्रहं व्याकरोम्यहम् ।
रामस्यानुग्रहेणैव किञ्चिदानन्दकन्दलम् ॥
आयुरारोग्यसौभाग्यं संप्रीतिस्त्रीप्रदायकम् ।
शृणु तान् पठितांश्चैव सीताराम सहा(रि)[नु]जाः ? ॥
तथा तु परमप्रीताः वाञ्छिदासान्निवेशयन् ?

वैवस्वतमनुमारभ्य आमि(?) तेषु चतुर्थचतुर्युगे त्रेतायां चतुर्थपादे हेविलम्बिनामसंवत्सरे चैत्रशुद्धनवम्यां बुधवारमध्याह्नवेलायां कटकलग्ने पुनर्वसुनक्षत्रे श्रीरामावतारः ।

End:

धातुसंवत्सरे चैत्रशुद्धसप्तमीदिने रामस्य पट्टाभिषेकः ।
ततस्तु प्रयतो वृद्धो वसिष्ठो ब्राह्मणैस्सह ।
श्रीरामाय परब्रह्मणे नमः ॥

Colophon:

इति श्रीरामायणसङ्ग्रहः सम्पूर्णः ॥

R. No. 4085.

रामस्तोत्रम् by हनुमत्

RĀMASTOTRAM by Hanumat

Fol. 10; 12 granthas.

Begins on fol. 10 (a) of the manuscript described under the previous number.

Same work as that described under D. No. 10418, wherein the 18th stanza is not seen. The title of D. No. 10418 is given as Sītarāmastotram, since it is in praise of both Rāma and Sītā. There are differences in readings here and there.

Complete.

Beginning :

कौसल्यासुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥
अयोध्यापुरिनेतारं मिथिलापुरिनायिकाम् ।
राघवाणामलङ्कारं विदेहानामलङ्कृताम् ।
रघूणां कुलदीपञ्च निमीनां कुलदीपिकाम् ॥
सूर्यवंशसमुद्भूतं सोमवंशसमुद्भवाम् ।

End :

सर्वलोकविधातारं सर्वलोकविधायिनीम् ।
लोकाभिरामं श्रीराममभिरामाञ्च मैथिलीम ॥
तस्य तौ ददतुः प्रीतौ सम्पदस्सकला अपि ।
कृतं हनुमता पुण्यं स्तोत्रं सद्यो विमुक्तिदम् ॥
यः पठेत्प्रातरुत्थाय सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति श्रीरामस्तोत्रं सम्पूर्णम् ॥

R. No. 8046.

राममानसपूजा

RĀMAMĀNASAPŪJĀ

Foll. 11 (*a*)—15 (*a*) ; 75 granthas.

Begins on fol. 11 (a) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 5800, but with a difference in the end as given on the next page.

Complete.

Beginning :

हृद्या मानसपूजा च कीदृशीयं तव प्रभो ।
उपचारैः कतिविधैः पूज्यसे रघुनन्दन ॥

End :

निवस त्वं रघुश्रेष्ठ सर्वैरावरणैस्सह ।
तत्सर्वं प्रीतये भूयान्नमो रामाय वेधसे ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व रघुनायक ॥

Colophon :

इति राममानसिकं सम्पूर्णम् ॥

R. No. 8047.

रामस्तवराजः

RĀMASTAVARĀJAḤ

Foll. 15 (a)–19 (b); 60 granthas.

Begins on fol. 15 (a) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 10303. Incomplete.

R. No. 8048.

रामहृदयम् (अध्यात्मरामायणम्)

RĀMAHṚDAYAM (ADHYĀTMARĀMĀYAṆAM)

Foll. 20 (a)–23 (a); 50 granthas

Begins on fol. 20 (a) of the manuscript described under R. No. 8044.

Wants the beginning :

Contains the 1st Adhyāya of Adhyātmarāmāyaṇam.

Beginning :

.........................श्यते ।
तथैव देहेन्द्रियकर्तुरात्मनः कृतं परेशस्य जनो विमुह्यति ॥

नाहो न रात्रिस्सवितुर्यथा भवेत् प्रकाशरूपाव्यभिचारतः क्वचित् ।
ज्ञानं तथाज्ञानमिदं द्वयं हरौ रामे कथं स्थास्यति शुद्धचिद्घने ॥

End :

जातिभ्रष्टोऽतिपापी परधनपरदारेषु सक्तोद्यतो वा ?
स्तेयी ब्रह्मघ्नमातापितृगुरुवधतो योगिबृन्दापहारी ? ।
यस्संपूज्याभिरामं पठति च हृदयं रामचन्द्रस्य भक्त्या
योगीन्द्रैरप्यलभ्यं पदमपि लभते सर्वदेवैस्स पूज्यः ॥

Colophon :

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे
बालकाण्डे रामहृदयं नाम प्रथमोऽध्यायः ॥

R. No. 8049.

रामकवचम्

RĀMAKAVACAM

Foll. 23 (*a*)—26 (*b*) ; 55 granthas.

Begins on fol. 23 (a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 7011.

Complete.

Beginning :

अस्य श्रीरामकवचस्तोत्रमहामन्त्रस्य बुधकौशिकविश्वामित्रभगवान् ऋषिः, अनुष्टुप्छन्दः, श्रीरामो देवता । श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्रस्वामिप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

* * * *

ध्यानम्:—

वामे कोदण्डदण्डं निजकरकमले दक्षिणे बाणमेकं
पश्चाद्भागे च नित्यं दयितमभिमतं सासितूणीरभारम् ।

वामेऽवामे लसद्भ्यां (सभ) [शुभ] ललिततनुं जानकीलक्ष्मणाभ्यां
श्यामं रामं भजेऽहं प्रणतजनमनःक्लेशविच्छेददक्षम् ॥
इन्दीवरश्यामलमायताक्षं धनुर्धरं नीलजटावचूडम् ।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां निषेव्यमाणं प्रणतोऽस्मि रामम् ॥

पञ्चपूजा ॥

श्रीकौशिक उवाच :—

ध्यात्वा नीलोत्पलं श्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामकुटमण्डितम् ॥
सासितूणिधनुर्बाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमद्रि....तमजं विभुम् ? ॥
रामरक्षां पठेत्प्राज्ञः पापघ्नं सर्वकामदम् ।
जेतुमिच्छास्ति यस्यैतद् भूयस्सर्वमयत्नतः ॥
विश्वामित्र ऋषिश्चैव अनुष्टुप् छन्द एव च ।
देवो रामश्च देवेशो देवता जानकीपतिः ॥
शिरो मे राघवः पातु फालं दशरथात्मजः ।
कौसलेयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥

End :

इत्येतानि जपेन्नित्यं मद्भक्त्या श्रद्धयान्वितः ।
अश्वमेधयुतं पुण्यं संप्राप्नोति न संशयः ॥
संप्राप्नोति न संशय ओं नम इति ॥
रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणाकरं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥
दक्षिणे लक्ष्मणो धन्वी जानकी वामतश्शुभा ।
पुरतो मारुतिर्यस्य तं नमामि रघूत्तमम् ॥
रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाःपतये नमः ॥

R. No. 8050.

गायत्रीरामायणम्

GĀYATRĪRĀMĀYAṆAM

Foll. 27 (a)–29 (a); 25 granthas. Printed.

Begins on fol. 27 (*a*) of the manuscript described under R. No. 8044.

Same work as that described under R. No. 4800(j).

Complete.

R. No. 8051.

आदित्यहृदयम् by **अगस्त्य**

ĀDITYAHṚDAYAM by Agastya

Foll. 29 (a)—32(a); 45 granthas. Printed.

Begins on fol. 29(a) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 17072.

Complete.

R. No. 8052.

पञ्चायुधस्तोत्रम्

PAÑCĀYUDHASTOTRAM

Foll. 32 (a)–33 (b); 15 granthas. Printed.

Begins on fol. 32 (a) of the manuscript described under R. No. 8044.

Same work as that described under R. No. 173(j); but with the addition of three stanzas at the end, as given below.

Complete.

End:

वने रणे शत्रुजलाग्निमध्ये यदृच्छया (श्वस्त) [पत्सु]महाभयेषु ।
इदं पठेत्स्तोत्रमनाकुलात्मा सुखी भवेत्तत्कृतसर्वरक्षः ॥

असुरदहनचक्रं भास्करं कोटिचक्रं कनककिरणचक्रं कामदण्डोग्रचक्रम् ।
प्रकटितभुजचक्रं पातु मां ब्रह्मचक्रं जयतु जयतु चक्रं श्रीमतां विष्णुचक्रम्॥
पातु प्रणतरक्षायां विलम्बमसहन्निव ।
सदा पञ्चायुधीं बिभ्रत्स नः श्रीरङ्गनायकः ॥

Colophon :

पञ्चायुधस्तोत्रं सम्पूर्णम् ॥

R. No. 8053.

कृष्णद्वादशनामस्तोत्रम्

KRṢṆADVĀDAŚANĀMASTOTRAM

Foll. 33 (b)–34 (a) ; 9 granthas. Printed.

Begins on fol. 33 (a) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 8887, but with additions at the end, beginning and colophon, as given below.

Complete.

Beginning :

अस्य श्रीकृष्णद्वादशनामस्तोत्रमहामन्त्रस्य ....
श्रीभगवानुवाच :—
किं ते नामसहस्रेण विज्ञा(ने)[ते]न तवार्जुन ।
तानि नामानि विज्ञेया नरे प्राप्ति प्रमुच्यते ? ॥
प्रथमं तु हरिं विद्यात् द्वितीयं पुरुषोत्तमम् ।

End :

अमायां पौर्णमास्याञ्च द्वादश्याञ्च विशेषतः ।
प्रातःकाले पठेन्नित्यं सर्वपापैः प्रमुच्यते ॥

Colophon :

इति श्रीमन्महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां
आरण्यपर्वणि कृष्णार्जुनसंवादे कृष्णद्वादशनामस्तोत्रं सम्पूर्णम् ॥

R. No. 8054.

लक्ष्मीद्वादशनामस्तोत्रम्

LAKṢMĪDVĀDAŚANĀMASTOTRAM

Foll. 34(b)–35(a); 10 granthas.

Begins on fol. 34 (b) of the manuscript described under R. No. 8044.

Similar to the work described under R. No. 2171 (q). This work has been named as Lakṣmīhṛdayam, at the end.

Complete.

Beginning :

श्रीदेवी प्रथमं नाम द्वितीयममृतोद्भवा ।

End :

एकादशं महालक्ष्मीः द्वादशं लोकनायकी ॥

श्रीः पद्मा कमला मुकुन्दमहिषी लक्ष्मीस्त्रिकोणेश्वरी
मा क्षीराब्धिसुता विरिञ्चिजननी विन्ध्या सरोजात्मिका ।
सर्वाभीष्टफलप्रदेति सततं नामानि ये द्वादश
प्रातश्शुद्धतराः पठन्ति सततं सर्वान् लभन्ते शुभान् ॥

इत्येति .... प्रोक्तं लक्ष्मीहृदयमुत्तमम् ।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्रियम्बके देवि दाक्षायणि नमोऽस्तु ते ॥

R. No. 8055.

गरुडद्वादशनामस्तोत्रम्

GARUḌADVĀDAŚANĀMASTOTRAM

Foll. 35 (b)–37 (b); 12 granthas.

Begins on fol. 35(b) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 8821.

Complete.

Beginning and end :

मङ्गलं भगवान्विष्णुर्मङ्गलं मधुसूदनः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलं गरुडध्वजः ॥
यन्मङ्गलं सुपर्णस्य विनताकल्पयत्पुरा ।
अमृतं प्रार्थयानस्य त(न्मे)[ते] भवतु मङ्गलम् ॥
पाणिग्रहे पर्वतराजपुत्र्याः पादाम्बुजं पाणिसरोरुहाभ्याम् ।
अश्मानमारोहयतः स्मरारेः मन्दस्मितं मङ्गलमातनोतु ॥
कुङ्कुमाङ्कितवर्णाय कुन्देन्दुधवलाय च ।
विष्णुवाह नमस्तुभ्यं पक्षिराजाय ते नमः ॥
अमृतकलशहस्तं कान्तिसम्पूर्णदेहं
सकलविबुधवन्द्यं वेदशास्त्रैकचिन्त्यम् ।
विविधसुलभपक्षैर्धूयमानाण्डकोशं
सकलविषविनाशं चिन्तयेत्पक्षिराजम् ॥
सुपर्णो वैनतेयश्च नागारिर्नागभूषणः ।
विषान्तको जितारिश्च अजितो विश्वतोमुखः ॥
गरुत्मन्तः खगपतिः तार्क्ष्यः कश्यपनन्दनः ।
एतानि द्वादश नामानि गरु(डाष्ट)[डस्य] महात्मनः ॥
यः पठेत् प्रातरुत्थाय स्वं वा सुप्तोत्थितोऽपि वा ।
विषं नाशयते तस्य नहि सन्ति(द्रि)[हि]पन्नगाः ॥
सङ्ग्रामाय मुखैर्जप्त्वा जयमाप्नोति मानवः ।
बन्धनान्मुक्तिमाप्नोति यात्रायां विजयी भवेत् ॥

Colophon :

इति गरुडद्वादशनाम सम्पूर्णम् ।

R. No. 8056.

रामायणश्लोकाः (चिरञ्जीविरामायणम्)

RĀMĀYAṆAŚLOKĀḤ (CIRAÑJIVIRĀMĀYAṆAM)

Foll. 36 (*a*)—37 (*a*) ; 16 granthas.

Begins on fol. 36 (*a*) of the manuscript described under R. No. 8044.

Same work as that described under R. No. 3988(c).

Complete in six stanzas, but wants the colophon.

Beginning :

पायात् क्षीराब्धिशायी कमलभवनतः कौसलेन्द्रस्य पुत्रो
रामः सौमित्रिमित्रः कुशिकसुतगिरा ताटकाप्राणहारी ।
यज्ञं निर्वर्त्य गङ्गाचरित (मिद)[मुदित] धीः पाव (यन्ता)[यंस्ता]महल्यां
सीतामुद्वाह्य जित्वा पथि भृगुतनयं प्राप हर्षादयोध्याम् ॥

End :

सेतुं बद्ध्वा समुद्रे सकलबलयुतं रावणं कुम्भकर्णं
हत्वा तत्पुत्रवर्गं तदनुजमभिषिच्या(ति)[पि] लङ्काधिनाथम् ।
सीतां लब्ध्वाग्निशुद्धां निखिलसुरनुतं पुष्पयानाधिरूढं
सुग्रीवाद्यैरुपेतं रघुपतिमनिशं प्राप्तराज्यं भजामि ॥

R. No. 8057.

राममङ्गलम्

RĀMAMAṄGALAM

Foll. 37 (a)—38 (b) ; 19 granthas.

Begins on fol. 37 (a) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 10289, but with the addition of six stanzas at the beginning and a different order of the stanzas at the end, as given below.

Complete.

Beginning :

श्रीरामचन्द्रः श्रितपारिजातः समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु ॥ १ ॥
मुनिमानसहंसाय मारसुन्दरमूर्तये ।
सिताब्जपत्रनेत्राय रामचन्द्राय मङ्गलम् ॥ २ ॥

सीतामानसचोराय श्रीवत्साङ्कितवक्षसे ।
शिवपूजाभिरक्ताय सीतारामाय मङ्गलम् ॥ ३ ॥
भरताग्रजधुर्याय भवभञ्जनहेतवे ।
सर्वलोकशरण्याय सीतारामाय मङ्गलम् ॥ ४ ॥
राकाशशाङ्कवक्त्राय पाकारातिनुताङ्घ्रये ।
लोकनाथैकवीराय साकेतेशाय मङ्गलम् ॥ ५ ॥
कान्तविभ्रमतान्ताय कृतान्तान्तविधायिने ।
नितान्तगुणयुक्ताय सीतारामाय मङ्गलम् ॥ ६ ॥
मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ७ ॥

End :

विभीषणकृते प्रीत्या विश्वाभीष्टप्रदायिने ।
जानकीप्राणनाथाय जगन्नाथाय मङ्गलम् ॥ २७ ॥
आसाद्य नगरीं (नित्यां)[दिव्यां] अभिषिक्ताय सीतया ।
राजाधिराजराजाय रामभद्राय मङ्गलम् ॥ २८ ॥

R. No. 8058.

मार्कण्डेयस्तोत्रम् ।

MĀRKAṆḌEYASTOTRAM

Foll. 39 (a)–40 (a) ; 17 granthas.

Begins on fol. 39 (a) of the manuscript described under R. No. 8044.

Same work as that described under R. No. 324(j), but with one more stanza at the end, as given below.

Complete.

End :

मार्कण्डेयमिदं स्तोत्रं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥
सत्यं सत्यं पुनस्सत्यं मम दोषो न विद्यते ।
वेदशास्त्रात्परं नास्ति न दैवं शङ्करात्परम् ॥

Colophon :

इति मार्कण्डेयस्तोत्रं सम्पूर्णम् ॥

R. No. 8059.

शिवस्तवः

ŚIVASTAVAḤ

Foll. 40 (*b*)—41 (*b*) 13 granthas.

Begins on fol. 40(b) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 11222 etc.

Contains six stanzas only.

Beginning :

वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥

End :

वन्दे पञ्चमुखाम्बुजं त्रिनयनं वन्दे ललाटेक्षणं
वन्दे व्योमकचं जटामुमकुटं वन्देन्दुगङ्गाधरम् ।
वन्दे नागभरं त्रिपुण्ड्रनिटिलं वन्देऽष्टमूर्त्यात्मकं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥
शङ्करस्य चरितं कथारसं चन्द्रशेखरगुणानुकीर्तनम् ।
नीलकण्ठ तव पादसेवितं संभवन्तु मम जन्मजन्मनि ॥

R. No. 8060.

अक्षरमालिकास्तोत्रम्

AKṢARAMĀLIKĀSTOTRAM

Foll. 41 (b)–44 (b) ; 45 granthas.

Begins on fol. 41 (b) of the manuscript described under R. No. 8044.

Complete.

Contains Stanzas beginning with successive letters of the Sanskrit alphabet in praise of Lord Śiva.

Beginning :

अद्भुतविग्रह अमराधीश्वर
अगणितगुणगण अमितशिव-हर ।
साम्बसदाशिव साम्बसदाशिव
साम्बसदाशिव पालय माम् ॥ १ ॥
आनन्दामृत आश्रितरक्षक
आत्मानन्द महेश शिव-हर ॥ २ ॥

End :

लालितभक्तजनेश्वर कालि ?
नटजनकमल ? सुरेश शिव-हर ॥ ५० ॥
अक्षरमाला अतिप्रियसुन्दर
साक्षात्स्वामिन् विश्वेश शिव-हर ॥ ५१ ॥
साम्बसदाशिव साम्बसदाशिव
साम्बसदाशिव पालय माम् ॥ ५२ ॥

Fol. 44(b) contains some stanzas of Svapnādhyāya.

R. No. 8061.

भारतसावित्री

BHĀRATASĀVITRĪ

Foll. 45(a)–52(b) ; 112 granthas.

Begins on fol. 45(a) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 5779 with the additional stanzas in the beginning and the end, as given below.

Complete.

Beginning :

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥

व्यास उवाच :—

द्वारवत्यां स्थितः कृष्णश्चिन्तयामास वै पुरा ।
पाण्डवानां हितार्थाय शीघ्रं कृष्णेन गम्यताम् ॥
श्रीकृष्णो रथवेगेन गत्वा वै हस्तिनापुरम् ।
विदुरस्य गृहं गत्वा कृष्णस्तेन महात्मनः ॥

End :

अहोरात्रकृतं पापं स्मरणेन विनश्यति ।
पठतां शृण्वताञ्चैव विष्णुमाहात्म्यमुत्तमम् ॥
दुःस्वप्नशासनं तेषां दुःस्वप्नो न प्रजायते ।
सा कथा भारती पुण्या द्रौपदी सा पतिव्रता ॥
तद्विदः पाण्डवा धन्याः प्रसन्ने पुरुषोत्तमे ।
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे च बहुस्ति[श्रु]ताय ।
पुण्याञ्च भारतकथां पठितां शृणोति
तुल्यं फलं भवति तश्यति[तस्यहि] तस्य चैव ॥
आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनं
द्यूतश्रीहरणं वने विहरणं मात्स्यालये वर्धनम् ।
लीलागोग्रहणं रणे विहरणं सन्धिक्रियाजृम्भणं
भीष्मद्रोणसुयोधनादिनिधनमे[नं ह्ये]तन्महाभारतम् ॥

Colophon :

इति श्रीमन्महाभारतसावित्री सम्पूर्णा ॥

R. No. 8062.

इन्द्राक्षीस्तोत्रम् ।

INDRĀKṢĪSTOTRAM

Foll. 52 (a)–56 (b) ; 50 granthas.

Begins on fol. 52 (b) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 10713.

Complete.

Beginning :

अस्य श्री इन्द्राक्षीस्तोत्रमहामन्त्रस्य, पुरन्दर ऋषिः, अनुष्टुप् छन्दः, इन्द्राक्षी देवता, महालक्ष्मीः बीजं, भुवनेश्वरी शक्तिः, माहेश्वरी कीलकम्, इन्द्राक्षीदेवीप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

* * * *

ध्यानम् :—

नेत्राणां दशभिश्शतैः परिवृतामत्युग्रचर्माम्बरां
हेमाभां महतीं विलम्बितशिखामामुक्तकेशान्विताम् ।
घण्टामण्डितपादपद्मयुगलां नागेन्द्रकुम्भस्तनी-
मिन्द्राक्षीं परिचिन्तयामि सततं प्रत्यक्षसिद्धिप्रदाम् ॥

किंशुकाधरविशाललोचनीं किञ्च नागवल्लिरसवासिनीम् ? ।
अङ्गचम्पकसमानवर्णिनीं शङ्करप्रियसखीं नमाम्यहम् ॥

पाशाङ्कुशां वज्रधरोरुहस्तां नानाविधालङ्करणां प्रपद्ये ।
पादस्मरैः सेवितपादपद्मामिन्द्राक्षि वन्दे शिवधर्मपत्नि ॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥

इन्द्राक्षीं सहयुवतीं नानालङ्कारभूषिताम् ।
प्रसन्नवदनाम्भोजामप्सरोगणसेविताम् ॥

इन्द्र उवाच :—

इन्द्राक्षी नाम सा देवी दैवतैस्समुदाहृता ।
गौरी शाकम्भरी देवी दुर्गानाम्नीतिविश्रुता ॥

महिषासुरसिंहारिः चामुण्डा सप्तमातरः ।
सर्वरोगप्रशमनी नारायणि नमोऽस्तु ते ॥

इन्द्राणी चेन्द्ररूपा च इन्द्रशक्तिपरायणी ।
वाराही नारसिंही च भीमा भैरवनादिनी ॥

* * * *

एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण धीमता ।
एतत्स्तोत्रं जपेन्नित्यं सर्वव्याधिविनाशनम् ॥
रणे राजभये चोरे सर्वत्र विजयी भवेत् ।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।

शरण्ये त्रियम्बके देवि नारायणि नमोऽस्तु ते ॥
त्रिपाद्भस्मप्रहरणः त्रिशिरा रक्तलोचनः ।
स मे प्रीतिसुखं दद्यात् सर्वामयपतिर्ज्वरः ॥

End :

मृत्योस्तुल्यं त्रिलोकीं ग्रसितुमतिरसान्निस्सृताः किं नु जिह्वाः
किं वा कृष्णाङ्घ्रिपद्मद्युतिभिररुणिता विष्णुपद्याः पदव्यः ।
प्राप्तास्सन्ध्याः स्मरारेः स्वयमुत नुतुभिस्तिस्र इत्यूह्यमाना
देवैर्देव्यास्त्रिशूलक्षतमहिषजुषो रक्तधारा जयन्ति ॥

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्जितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे
सिंहध्वंसिनि सिंहराजदुरितं दुर्गे नमस्तेऽम्बिके ॥

श्रीमहादेव्यै नमः ॥

त्रिशिरस्ते प्रसन्नोहमोदुते [हं मामूचे] मज्ज्वराद्भयम् ।
यो नौ स्मरति संवादं सत्यं त्वं [तत्] न भवेद्भयम् ॥

अष्टौभुजाङ्गीं महिषस्य मर्दनीं सशङ्खचक्रां शरशूलधारिणीम् ।
त्वां दिव्ययोगिं सहजातवेदसीं दुर्गां सदा शरणमहं प्रपद्ये ॥ ओम् ॥

R. No. 8063.

शिवकवचः

ŚĪVAKAVACAḤ

Foll. 56(b)—63 (b). 80 granthas.

Begins on fol. 56(b) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 7378, but without the portion relating to the Rṣi Chandas and Nyāsa, and with a different end, as given below :—

Complete.

End :

यो दत्ते कवचं शैवं स देवैरपि पूज्यते ।
महापातकसङ्घातैर्मुच्यते सर्वपातकैः ॥
देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ।
त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् ॥
धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥

R. No. 8064.

नदीस्तोत्रम् ।

NADĪSTOTRAM

Foll. 63 (b)–65(a) ; 25 granthas.

Begins on fol. 63(b); of the manuscript described under R. No. 8044.

Same work as that described under D. No. 956, but for a different colophon where it has been named as " Mānasikasnānam".

Complete.

This work has been named as Mānasika-snānam in the colophon.

Colophon :

इति वामनपुराणे गङ्गामाहात्म्ये हरिहरब्रह्मप्रोक्ते
ब्रह्मनारदसंवादे मानसिकस्नानं सम्पूर्णम् ॥

R. No. 8064(a).

गङ्गास्तोत्रम्

GAṄGĀSTOTRAM

Foll. 65 (a)-67(b) ; 20 granthas.

Begins on fol. 65(a) of the manuscript described under R. No. 8044.

Same work as that described under, D. No. 9368 with three additional stanzas in the beginning, as given below.

Beginning :

गङ्गाया दक्षिणे भागे योजनानां शतद्वये ।
पञ्चयोजनमात्रेण पूर्वाम्भोधेस्तु पश्चिमे ॥
वेगवत्युत्तरे तीरे पुण्यकोट्यां हरिस्स्वयम् ।
वरदः सर्वभूतानामद्यापि परिदृश्यते ॥
वपापरिमळोल्लासभासिताधरपल्लवम् ।
मुखं वरदराजस्य मुग्धस्मितमुपास्महे ॥
भगवति भवलीलामौलिमाले तवाम्भः-
कणमणुपरिमाणं प्राणिनो ये स्पृशन्ति ।
अमरनगरनारीचामरग्राहिणीनां
विगतकलिकलङ्कातङ्कमङ्के लुठन्ति ॥

End :

मातर्जाह्नवि शम्भुशङ्कवदनिदे [सङ्गमिलिते] मौलौ निधायाञ्जलिं
त्वत्तीरे वपुषोऽवसानसमये नारायणाङ्घ्रिद्वयम् ।
सानन्दं स्मरतो भविष्यति मम प्राणप्रयाणोत्सवे
भूयाद्भक्तिरविच्युता हरिहराद्वैतात्मिका शाश्वती ॥ ८ ॥
गङ्गे त्रैलोक्यसारे सकलसुरवधूधूतविस्तीर्णतोये
पुण्ये ब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे ।
प्रायश्चित्तं यदि स्यात् तव जलकणिका ब्रह्महत्यादिपापे
कस्त्वा स्तोतुं समर्थस्त्रिजगदघहरे देवि गङ्गे प्रसीद ॥ ९ ॥

गङ्गा गङ्गेति यो ब्रूयाद् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

अहं काशीं गमिष्यामि तत्रैव हि वसाम्यहम् ।
इति ब्रुवाणस्सततं काशीवासफलं लभेत ॥

Colophon:

इति गङ्गास्तोत्रं सम्पूर्णम् ॥

R. No. 8065.

रामकृष्णशिवस्तोत्रम्

RĀMAKṚṢṆAŚIVASTOTRAM

Foll. 67 (b)—69 (b) ; 25 granthas.

Begins on fol. 67(b); of the manuscript described under R. No. 8044.

Contains Stanzas in praise of Śrī Rāma, Kṛṣṇa and Śiva. At the end, there are a few Cāṭuślokās (witty stanzas) also. Complete.

Beginning :

वैदेहीकुचमण्डलेन्दुनयनं[गगनं]माणिक्यमुक्तावली—?
मध्यस्थं नवनीतकोमलरुचिं नीलोत्पलश्यामलम् ।
कन्दर्पायुतकोटिकान्तिसदृशं पूर्णेन्दुबिम्बाननं
कौसल्याकुलभूषणं रघुपतिं सीतासमेतं भजे ॥

भक्तापायभुजङ्गगारुडमणिः त्रैलोक्यरक्षामणिः
गोपीलोचनचातकाम्बुदमणिस्सौन्दर्यमुद्रामणिः ।
यः कान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः
श्रेयो देवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥

End :

शूली जातः कदशनवशाद् भिक्षुचर्यात्कपाली
वस्त्राभावाद् गगनसदृशः स्नेहशून्याज्जटावान् ।
एवं राजंस्तव परिचयादीश्वरत्वं मयाप्तं
किञ्चिद्दातव्यमेतत्तव करयुगलेनार्धचन्द्रं ददस्व ॥

R. No. 8066.

महालक्ष्मीस्तोत्रम्

MAHĀLAKṢMĪSTOTRAM

Foll. 70 (a)—72 (b) ; 80 granthas.

Begins on fol. 70(a) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 8877, but with a difference in the beginning, end and colophon, as given below.

Complete.

Beginning :

अस्य श्रीमहालक्ष्मीस्तोत्रमहामन्त्रस्य, ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता, प्रकृतिः बीजम्, भुवनेश्वरी शक्तिः, महालक्ष्मीः कीलकम्, मम दारिद्र्यमोचनार्थे सकलराजवशीकरणार्थे जपे विनियोगः ।

ध्यानम् :—

वन्दे पद्मकरां प्रसन्नवदनां क्षौमांशुकां भाग्यदां
हस्ताभ्यामभयप्रदां मणिगणैर्नानाविधैर्भूषिताम् ।
भक्ताभीष्टवरप्रदां हरिहरब्रह्मादिभिस्सेवितां
पार्श्वे पङ्कजशङ्खपद्मनिधिभिर्युक्तां तथा शक्तिभिः ॥

प्रकृतिं विकृतिं विप्रां सर्वभूतनिवासिनीम् ।
श्रद्धां भक्तिं विमुक्ताञ्च नमामि प्रणवात्मिकाम् ॥

End :

सिद्धलक्ष्मीं महाविद्यां नमामि भुवनेश्वरीम् ॥

इतीरितं परं नाम नाम्नामष्टोत्तरं शतम् ।
त्रिकालं यो जपेत् विद्वान् षण्मासं तु जितेन्द्रियः ॥

* * *

तस्मात्सर्वप्रयत्नेन श्रियं पूजय पार्वति ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः ।
दारिद्र्यमोचनं नाम स्तोत्रमष्टोत्तरं शतम् ॥

Colophon :

इति रत्नकोशाख्ये उमामहेश्वरसंवादे महालक्ष्मीस्तोत्रं सम्पूर्णम् ॥

R. No. 8067.

शरभेश्वरमन्त्रः

ŚARABHEŚVARAMANTRAḤ

Foll. 73 (a)-74 (a) ; 15 granthas.

Begins on fol. 73 (a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 7367.

Complete.

Beginning :

अस्य श्रीशरभेश्वरमहामन्त्रस्य, कालाग्निरुद्र ऋषिः, गायत्री च्छन्दः, शरभः सालुवेशपक्षिराजो देवता, खं बीजं स्वाहा शक्तिः, फट् कीलकम्, शरभेश्वरप्रसादसिद्ध्यर्थे भूतप्रेतपिशाचक्षुद्रशत्रुसर्वनिग्रहार्थे जपे विनियोगः ।

ध्यानम् :—

चन्द्रादित्याग्निदृष्टिः कुलिशवरनखश्चञ्चलात्युग्रजिह्वः
काली दुर्गा च पक्षौ हृदयजठरगो भैरवो बाडवाग्निः ।
ऊरुस्थौ व्याधिमृत्यू वरनखस[द्य]ुतश्चण्डवातातिवेगः
संहर्ता सर्वशत्रून् विजयतु शरभः सालुवः पक्षिराजः ॥
पञ्चपूजा :—

End :

मूलम् :—

ओं खें खं फट् प्राणगृहासि प्राणगृहासि हुं फट् सर्वशत्रुसंहारणाय शरभसालुवाय पक्षिराजाय हुं फट् स्वाहा । ओं नमो भगवते ज्वल ज्वल प्रज्वल प्रज्वल सर्वसाध्यं मह्यं रक्ष रक्ष सर्वदुष्टेभ्यो हुं फट् स्वाहा ॥

R. No. 8067(a).

शरभमालामन्त्रः

ŚARABHAMĀLĀMANTRAḤ

Foll. 74(b)-78(a) ; 60 granthas.

Begins on fol. 74 (a) of the manuscript described under R. No. 8044.

Same work as that described under D. No. 8096 with a slight difference in the readings.

Complete.

R. No. 8068.

शरभपूजायन्त्रम्

ŚARABHAPŪJĀYANTRAM

Foll. 78 (a)-79 (a) ; 8 granthas.

Begins on fol. 78 (a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 8089 and 8100.

Complete.

Beginning :

त्रिकोणं विलिखेत्पूर्वं तद्बाह्ये तु दलद्वयम् ।
द्वादशारं च तद्बाह्ये तद्बाह्ये तु नवाश्रकम् ॥
सप्ताश्रकञ्च पञ्चाश्रं भूपुरं चक्रमालिखेत् ॥

End :

षट्सप्तकोष्ठेषु विलिख्य शरभं रेखाग्रशूलञ्च तदग्रसाध्यकम् ।
बाह्ये तु मायावृततारवेष्टितं जयाधिकं साधितुमाशु चक्रम् ॥

R. No. 8069.

(शरभ) होमयन्त्रविधिः—द्राविडटीकासहितः

(ŚARABHA) HOMAYANTRAVIDHIḤ-with Tamil meaning

Foll. 79 (a)-82 (b) ; 60 granthas.

Begins on fol. 79 (a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 8099.

Complete.

Beginning :

कृष्णावर्णां ज्वलत्केशीं शूलहस्तां कपालिनीम् ।
खङ्गचर्मधरां बाणधनुर्हस्तां महाभुजाम् ॥
अग्निज्वालामयीं दुर्गां सम्भाव्य शरभः स्वयम् ।
त्रिकोणं विलिखेत्पूर्वं तद्बाह्ये तु नवाश्रकम् ।
द्वादशारं लिखेत्पश्चात् तद्बाह्ये तु नवाश्रकम् ।
सप्ताश्रकं च पञ्चाश्रं भूपुरं च लिखेत्क्रमात् ॥

* * *

होमयन्त्रमिदं पुण्यं स सप्तावरणकं परम् ? ।
सर्वसिद्धिप्रदं श्रेष्ठं सर्वसम्पत्प्रदायकम् ॥

* * *

अनेनैव[हि]यन्त्रेण साक्षाच्छिवसमो भवेत् ।

இது ஹோமயந்த்ரம், பூஜாயந்த்ரமுமாகும். வ்யாக்யானம்.

* * *

ध्यानश्लोकाः—

ज्वलनकुटिलकेशं सूर्यचन्द्राग्निनेत्रं निशिततरनखाग्रैर्धूतहोमारिदेहम् ।
शरभमथ मुनीन्द्रैस्सेव्यमानं सिताङ्गं प्रणतभयविनाशं भावयेत्पक्षिराजम् ॥
शिखियुगपुरमध्ये शक्तिबीजञ्च कोणे प्रथि(ति)गृहमति(पि)मन्त्रं सप्तवर्णं लिखित्वा।
इषुमनुमथ बाह्ये षोडशारे त्रिवर्णं महियुतयतमेतत् साळुवेशस्य यन्त्रम् ? ॥
अस्यार्थः—

* * *

जपेद्वर्णसहस्राणि संख्यानि च महेश्वरि ।
दशांशं तर्पणं होमं शतांशं द्विजभोजनम् ॥

सहस्रांशमथो देवि क्रमादेवं समाचरेत् ।
होमद्रव्याणि वक्ष्यामि अधुना शृणु पार्वति ॥

End :

श्री शिव उवाचः—

वदाम्यशेषं शृणु होमभेदक्रियाविधानं गिरिराजकन्ये ।
नूनं महाभूतपिशाचरोगज्वराभिदुष्टाघविमोहशान्त्यै ॥

* * *

க்ஷீரஹோமத்துக்கு த்ரவ்யம் ; நாயுருவி, வங்ஹி, கருங்காலி, (இது ஸமித்து), கடுத்ரயம், த்ரிபலை, உப்பு, கடுகு, நெய் இந்த 9 த்ரவ்யமும் க்ஷீரஹோமத்துக்கு.

R. No. 8069 (a)

शूलिनीदिग्बन्धनमन्त्रः

ŚŪLINĪDIGBANDHANAMANTRAḤ

Foll. 83 (a) 86 (b) ; 50 granthas.

Begins on fol. 83 (a) of the manuscript described under R. No. 8044.

Same work as that described under R. No. 1595 (e), with the additions of Hṛdayādinyāsa and Dhyānaślokas, as given below :—

Complete.

Beginning :

अस्य श्रीशूलिनीदिग्बन्धनमहामन्त्रस्य, ब्रह्मा ऋषिः, गायत्री च्छन्दः, शूलिनी दुर्गापरमेश्वरी देवता, दुं बीजं, स्वाहा शक्तिः, श्रीशूलिनीदुर्गापरमेश्वरीप्रसादसिद्ध्यर्थे दिग्बन्धने विनियोगः ।..................ओं भूः ओं नमो भगवति ज्वल ज्वल शूलिनि हृदयाय नमः ।..................भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम्—

बिभ्राणा शूल(पाण्या)[बाणा]स्यभयवरगदाचापपाशान् कराब्जैः
मेघश्यामा किरीटोल्लसितशशिकला भीषणा भूषणाढ्या ।

सिंहस्कन्धाधिरूढा चतसृभिरसिखेटान्विताभिः परीतां
कन्याभिर्भिन्नदैत्या भवतु भवभयध्वंसिनी शूलिनी नः ॥

ओं नमो भगवति अ(स्ति)[सित]भैरवसहिता या ब्राह्मीश्वरी गजारूढे ज्वल ज्वल शूलिनि वज्रायुधधारिणि चोरादिव्याघ्रभूतप्रेतपिशाचब्रह्मराक्षस-शाकिनीडाकिनीभूतप्रेतालादिसर्वग्रहोच्चाटय मां रक्ष, इन्द्रा दिशं बन्ध मां रक्ष, सर्वग्रहोच्चाटनं कुरु, कुरु, लं ह्रीं हुं फट् स्वाहा ।

* * *

एवं वाहनायुधबीजसहितदिग्बन्धनं कुर्यात् । ओं नमो भगवति मेषा-रूढे शक्तिधारिणि ह्रीं ह्रूं फट् स्वाहा ।

* * *

दिग्बन्धनमालामन्त्रः——

ओं नमो भगवति ज्वल ज्वल शूलिनि सर्वशत्रुसंहारिणि सकलभूतादि-नाशिनि दुं दुर्गे वं वटुकभैरवि वागीश्वरि मम शत्रून् नाशय नाशय स्वाहा । ओं नमो भगवति ज्वल ज्वल शूलिनि सर्वशत्रुसंहारिणि सकलभूतविनाशिनि सकलराक्षससंहारिणि सिंहवाहिनि अष्टभुजे अष्ट[ट्ट]हासध्वंसिनि ।

* * *

आत्ममन्त्र आत्मयन्त्र तन्त्रविधान्(?)साधय मां रक्ष रक्ष मम परिवारान् रक्ष रक्ष ।

End :

ओं नमः कृष्णवाससे दुं दुर्गे वं वटुकभैरवि मम शत्रून् नाशय नाशय हुं फट् स्वाहा ॥

सूर्यन्त्राणां दशाङ्गं कुर्यात्——

प्राणशक्तिश्च बीजश्च प्राणस्थापनमेव च ।
मन्त्रो यन्त्रं च गायत्री दृष्टिजीवा ? तथैव च ॥
दिक्पालभूतबीजानि यन्त्रस्याङ्गानि वै दश ॥

R. No. 8070.

यन्त्रप्रतिष्ठा–शूलिनीमन्त्रसहिता

YANTRAPRATIṢṬHĀ with Śūlinīmantra

Foll. 87 (a)–97(a); 40 granthas.

Begins on foll. 87(a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 6994.

Complete.

Beginning:

अस्य श्रीयन्त्रप्राणप्रतिष्ठामहामन्त्रस्य ब्रह्मा विष्णुर्महेश्वर ऋषिः, ऋग्यजुस्सामाथर्वणच्छन्दांसि, प्राणशक्तिपरमात्मा देवता, आं बीजं, ह्रीं शक्तिः, ॐ कीलकं, यन्त्रप्राणप्रतिष्ठासिद्ध्यर्थे जपे विनियोगः ।

* * *

ध्यानम्—

रक्ताम्भोधिस्थपोतो[ल्ल]सदरुणसरोजा(ति)[धि] रूढं कराब्जैः,
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्च बाणान् ।
बिभ्राणा(भृत्क)[सृक्क]पालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

ओं आं ह्रीं क्रों यरलवशषसहों क्षं वं सं हंसस्सोऽहं यन्त्रस्य प्राण इह प्राण यन्त्रस्य जीव इह (जीव)स्तितं ? । यन्त्रस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणप्राण इहागत्यास्मिन् यन्त्रे सुखं चिरं तिष्ठन्तु स्वाहा ।

असुनीते पुनरस्मासु चक्षुः । .... मृलयानस्स्वस्ति ।

* * *

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन यन्त्रेऽस्मिन् सन्निधिं कुरु ॥

* * *

षोडशोपचारान् कृत्वा—

अस्य श्रीशूलिनीदुर्गादेवीमहामन्त्रस्य, दूर्वासभगवान् ऋषिः, गायत्रीच्छन्दः, श्रीशूलिनी दुर्गादेवी देवता, दुं बीजं, स्वाहा शक्तिः, फट् कीलकम्, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

* * *

ध्यानम्—

कल्पान्तानलकोटिकोटिसदृशं दिव्यं त्रिशूलायुधं
पाणिभ्यां परिगृह्य पञ्चवदनस्कन्धाधिरुह्यस्थिताम् ।
विश्वाशां प्र-वीरशक्तिविविधक्रीडाविशेषारवां
स्वस्तक्षुद्रसमस्तशत्रुनिवहां ध्यायेन्महाशूलिनीम् ॥
बिभ्राणा शूलबाणास्यभय .... शूलिनी नः ॥
अर्धारूढां मृगेन्द्रं सजलजलधरश्यामलां हस्तपद्मैः
शूलं बाणं कृपाणं त्वरिजलजगदाचापपाशान् वहन्तीम् ।
चन्द्राचूडां त्रिणेत्रां चतसृभिरसि(नं)[कं] खेटकं बिभ्रतीभिः
कन्याभिस्सेव्यमानां प्रतिभटभयदां शूलिनीं भावयामि ॥

मूलमन्त्रम्—

ओं श्रीं ह्रीं दुं ज्वल ज्वल शूलिनि दुष्टग्रह हुं फट् स्वाहा ॥
१६००० (16000) ஜ ॥
दशांशं तर्पयेत्पश्चात् शतांशं होममाचरेत् ॥

End:

मुद्गं सर्षपपिष्टञ्च कुर्याद्वैकैकशः क्रमात् ।
दक्षिणाद्यङ्गपूर्वं तु कारयेद्धि जपं मनोः ॥

R. No. 8071.

शूलिनीमालामन्त्रः

ŚŪLINĪMĀLĀMANTRAḤ

Foll. 90 (a)–92 (a); 32 granthas.

Begins on fol. 90 (a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 7426.

Complete.

Beginning :

अस्य श्रीशूलिनीदुर्गामालामन्त्रस्य, ब्रह्मा ऋषिः, गायत्री च्छन्दः, श्रीशूलिनीदुर्गा देवता, दुं बीजं, स्वाहा शक्तिः ।

ओं नमो भगवति ज्वल ज्वल शूलिनि सर्वशत्रुसंहारिणि सकलभूतविनाशिनि अष्टभुजेऽट्टहासिनि ह्रीं दुं ज्वल ज्वल शूलिनि धेहि आवेशय....

End :

कालरात्रि विलासिनि प्रत्यङ्गिरे महाशूलिनि मां रक्ष रक्ष । मम शत्रून् भक्षय भक्षय । सर्वदुष्टेभ्यो हुं फट् स्वाहा ॥

R. No. 8072.

शूलिन्याकर्षणमन्त्रः—यन्त्रविधिसहितः

ŚŪLINYĀKARṢAṆAMANTRAḤ with Yantravidhi

Foll. 92(a)-93 (b); 20 granthas.

Begins on fol. 92 (a) of the manuscript described under R. No. 8044.

Contains Mantras addressed to Śūlinī with their relative Yantras, the chanting of which is considered to be efficacious in protecting the devotee and getting everything under his control. Incomplete.

Beginning :

आकर्षणम्:—

ओं नमो भगवति सिंहवाहिनि शूलिनि दुर्गापरमेश्वरि सृष्टिस्थितिसंहारकारिणि सोमसूर्याग्निलोचनि शङ्खचक्रचापबाणखड्गखेटपाशाङ्कुशशूलकुन्तलमुसलमुद्गरतोमरवज्रामुष्टिभिण्डिपालशक्तिदण्डधारिणि महानिधियुतापकेलिनि(?) हुंकारभैरवि यज्ञेश्वरि मां रक्ष ।

End :

सकलरोगान् नाशय नाशय, सर्वकर्माणि साधय वरिका(?) हुं फट् अभिवृद्धिं देहि स्वाहा ॥

सवायुवृत्तमृतुकोणकोणे लक्ष्मीश्च मायामथ तारसाध्यम् ।
आराध्य यन्त्रं प्रजपेत्सहस्रमाकर्षणं स्याच्च चराचराणाम् ॥

अस्यार्थः—

आदौ वृत्तं विलिख्य, तदन्तः वायुबीजं, तद्बहिः षट्कोणं, षट्कोणेषु हुं, श्रीं, ह्रीं विलिख्य, तद्बहिः प्रणवेन वेष्टयेत् ।

प्रणवोदरे साध्यं विलिख्य ध्यानम् ।

R. No. 8073.

शूलिनीमन्त्रवर्गः

ŚŪLINĪMANTRAVARGAḤ

Foll. 93 (b)—98 (b) ; 80 granthas.

Begins on fol. 93 (b) of the manuscript described under R No. 8044.

Contains various Mantras considered to be efficacious in curing diseases and removing poisons etc. A list of various Mantras has been given at the end.

Incomplete.

Beginning :

ஜ்வரம் நிற்கிறதிற்கு :—

ओं अस्य श्रीशूलिनीदुर्गापरमेश्वरीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्रीच्छन्दः, श्रीशूलिनीदुर्गापरमेश्वरी देवता । ओं बीजं, ह्रीं शक्तिः, स्वाहा कीलकम् , श्रीं शूलिनीदुर्गापरमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादि षडङ्गन्यासः । ध्यानम् :—

मूलश्रीभैरवादित्रिविधपदमहादेवताभिः परीते
दिव्ये सिंहासनेन्द्रे स्थितमखिलकलाबोधकं देशिकेन्द्रम् ।
तस्याङ्के संनिषण्णामरुणरुचिचयारञ्जितासा(शा)वकाशां
देवीमानन्दपूर्णाममृतकरतलामाश्रयेऽभीष्टसिद्ध्यै ॥

बिभ्राणां शूलबाणास्यभय..........शूलिनी नः ॥

मूलमन्त्रः—

ह्रीं ओं, ज्वल, ज्वल शूलिनि दुष्टग्रह हुं फट् स्वाहा ।

खां, ओं, नमो भगवति अमृतजनके ज्वल ज्वल शूलिनि अमृतप्लावने सर्वविधज्वरं शमय शमय, मोचय शीघ्रं मोचय अमृतमये स्वाहा ।

अनेन शतधाभिमन्त्र्य त्रिदिनात् सर्वज्वरं मोचयेत् ॥

End :

प्रभुकोपशमनम्——उच्चाटनत्तुक्कु (உச்சாடனத்துக்கு)—हुं ग्रह फट् स्वाहा । ज्वल ज्वल शूलिनि दुष्ट ....

The following is the list of Mantras given in this work :

Fol.

94(a) ज्वरमोचनमन्त्रः ।
,, सकलहृद्दोषशान्तिमन्त्रः ।
94(b) सर्वत्रेदनशान्तिकरसन्निपशुन्घनमन्त्रः ।
,, शिरस्तोदप्रशमनमन्त्रः ।
,, (हिक्का)प्रभृति निवर्तनमन्त्रः ।
95(a) स्फोटकभेदमन्त्रः ।
,, सर्वक्षतशान्तिमन्त्रः ।
95(b) सर्व[र्प]विषशान्तिमन्त्रः ।
,, आखुविषहरमन्त्रः ।
,, शुनकविषहरमन्त्रः ।
96(a) सकलभक्ष्यविषहरमन्त्रः ।
,, स्वप्नदर्शनसिद्धिमन्त्रः ।
96(b) बालग्रहदोषनिवृत्तिमन्त्रः ।
97(a) सर्वोपद्रवनिवृत्तिमन्त्रः ।

Fol.

,, वृश्चिकविषहरमन्त्रः ।
,, संहारोच्चाटनमन्त्रः ।
97(b) भूतबाधाहरमन्त्रः ।
,, चोरबाधानिवृत्तिमन्त्रः ।
,, शत्रुसर्पनिवृत्तिमन्त्रः ।
,, वागार्तिनिवर्तनमन्त्रः ।
,, क्षीणगर्भविनाशनमन्त्रः ।
,, प्रतिवादिविनाशनमन्त्रः ।
,, कन्याकुचनिवर्तनम् ।
98(a) भूतरोगशमनमन्त्रः ।
,, प्रतिकारक्रियाकरमन्त्रः ।
,, प्रभुकोपशमनमन्त्रः ।
,, उच्चाटनमन्त्रः ।
98(b) शूलिनीचक्रम् ।
,, शरभचक्रम् ।

R. No. 8074.

स्वर्णाकर्षणभैरवमन्त्रः

SVARṆĀKARṢAṆABHAIRAVAMANTRAḤ

Foll. 99 (a)–100 (a) ; 19 granthas.

Begins on fol. 99(a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 7633.

Complete.

Beginning:

अस्य श्रीस्वर्णाकर्षणभैरवमहामन्त्रस्य दक्षिणामूर्ति ऋषिः, अमृतविराट् छन्दः, स्वर्णाकर्षणभैरवो देवता । ओं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, स्वर्णाकर्षणभैरवप्रसादसिद्धयर्थे जपे विनियोगः ।

* * *

एवं हृदयादिन्यासः । ध्यानम्——

मन्दारद्रुममूलभासुरतले माणिक्यसिंहासने
दिव्ये रत्नमये सुचम्पकरुचौ देव्या समालिङ्गितम्[ः] ।
भक्तेभ्यो वररत्नपात्रभरितं स्वर्णं ददानोऽनि(ह)[श]म्
स्वर्णाकर्षणभैरवो भवतु मे दारिद्र्यविद्रावणः ॥

मरकतमणिपात्रे सम्भृतं स्वर्णपूरं कृपणतरजनेभ्यो पारदं संप्रदात्रे ? ।
करुणहृदय सपर्या सेव्यमानाय नित्यं सुरवरभुज(गानां)गेन्द्रो ओं श्रीं
ह्रीं आपतो[दु]द्धारणाय ? ॥

मूलमन्त्रम्: ओं श्रीं ह्रीं क्लीं ओं नमो भगवते श्रीस्वर्णाकर्षणभैरवाय प्रणता(र्ति ?)भीष्टपरिपूर्णा[रणा]य एहि करुणानिधे मह्यं हिरण्यं दापय श्री ॥

End:

अष्टावशेषितं ताम्रं अष्टदाकदाशुद्धिकम् ? ।
स्वदर्शण्यकि दर्शाचा कन्दुकीकल्म(हे)[षा]पहा ? ॥
ज्योतिष्मतं स्वर्णमाता वेदा परमहंबिका ? ॥

R. No. 8075.

अथर्वणभद्रकालीमन्त्रः—सचक्रविधिः

ATHARVAṆABHADRAKĀLĪMANTRAḤ with Cakravidhi

Foll. 100 (a)–101 (a) ; 20 granthas.

Begins on fol. 100 (a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 5867.

Complete.

Beginning :

अस्य श्रीअथर्वणभद्रकालीमहामन्त्रस्य प्रत्यङ्गिरा ऋषिः, अनुष्टुप् छन्दः, अथर्वणभद्रकाली देवता । क्षां बीजम्, हूं शक्तिः, फट् कीलकम्, मम सर्वभूतविनाशनार्थेऽथर्वणभद्रकालीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ध्यानम् :—

कालीं कङ्कालवदनां कालजीमूतसंनिभाम् ।
भीमदंष्ट्रां ज्वालनेत्रां त्रयीज्वालां शिखोज्ज्वलाम् ॥
अष्टनागकृताकल्पां अष्टदिक्पूर्णविग्रहाम् ।
परप्रयुक्तकर्मघ्नीं परं राज्यप्रदायिनीम् ॥
समस्तशत्रुघ्नि (ध्यायेत्) प्रत्यङ्गिरामेवं परप्रेरितशान्तये ॥

पञ्चपूजा—

* * * *

मूलमन्त्रः—

क्रीं ह्रीं श्रीं भक्ष ज्वालाजिह्वे करालदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हूं फट् ।

* * * *

एकाशीतिपदं लिख्य शूलं पञ्चारमध्यतः ।
खण्डेष्वीशानमारभ्य मध्यवर्त्यावसानकम् ? ॥

End :

ओं आं ह्रीं क्रों एहि स्फुर अघोरवीर । बन्ध । बानलप्रगले[बडबानल गले] दुष्टशत्रून् संहारय । दुष्टग्रहान् भक्षय—मर्दय—प्रयुक्तो भ्रामय निर्वीर्यं कुरु, निर्जीवं कुरु, बालायनं कुरु ह्रीं ह्रीं क्रों श्रीं ह्रीं क्रों, श्रीं ह्रीं हुं फट् स्वाहा ॥

Colophon :

इति अथर्वणभद्रकाली[मन्त्रः] ।

R. No. 8076.

भाषामन्त्रः–वैद्यविषयः (द्राविडः)

BHĀṢĀMANTRAḤ–VAIDYAVIṢAYAḤ (in Tamil)

Foll. 101 (a)—106 (b) ; 75 granthas.

Begins on fol. 101(a) of the manuscript described under R. No. 8044.

For description see the Tamil Part.

Foll. 107 and 108 contain some horescopes. Fol. 109 contains Budhavākyam and Śukravākyam. Fol. 110(a) contains Śanivākyam.

R. No. 8077.

अष्टकवर्गः–द्राविडव्याख्यासहितः

AṢṬAKAVARGAḤ with a Tamil Commentary

Foll. 110 (a)–129 (a) ; 250 granthas.

Begins on fol. 110(a) of the manuscript described under R. No. 8044.

Similar to the work described under D. No. 13620.

Fol.129(b) is blank.

Complete.

Beginning :

த்ரிகோணசோதனை பண்ணுகிறவிவரம்:—த்ரிகோணமாவது, மேஷஸிம்மதனுஸ— விருஷபகன்யாமகரம், மிதுனதுலாகும்பம், கர்கிவ்ருச்கிகமீனம்-இவை த்ரிகோண ராசி என்று சொல்லப்படும்.

त्रिकोणेषु च ये न्यूनं तत्तुल्यं त्रिषु शोधयेत् ।
एकस्मिन्(चेद्) भवेन्न्यूनं त्रिकोणमनुशोधयेत् ।

* * *

क्षीणेन सह चान्यस्मिन् शोधयेद्ग्रहवर्जयेत् ?।

* * *

ग्रहयुक्ते फलं हीनं ग्रहाभावे फलाधिकम् ।
न्यूनेन सहशोऽन्यस्मिन् शोधयेत् ग्रहवर्जयेत् ? ॥

* * *

कुलीरसिंहयो राश्योर्द्विधा क्षेत्रं पृथक्फलम् ।
आत्मप्रभावशक्तिश्च पितृचिन्ता रवेः फलम् ॥

(எ-து) ஸூர்யாஷ்டகவர்க விது [பிந்து] பலன்கொண்டு ப்ரபுத்வம், ஸாமர்த்யம், பித்ருகுணதோஷம், சொல்லவும்.

मनो बुद्धिप्रसादश्च मातृचिन्ता च चन्द्रमाः ।

(எ-து) சந்த்ராஷ்டவர்கவிது[விந்து]பலன்கொண்டு மனஸுக்கு ஸந்தோஷமும் மாத்ருகுணதோஷமும் சொல்லவும்.

End :

षष्ठाष्टमव्ययं दत्वा शेषाण्येवं प्रकल्पयेत् ।

* * *

சனி நின்ற ராசி துவக்கி லக்னமளவும் எண்ணி சனி நின்ற ராசி (முதல் குஜனள)வும் எண்ணி இந்த ரெண்டு பிந்துவை க்கூட்டி 20 (உம்) ஏற இந்த சேஷம் எத்தனையோ, அத்தனையாம் வருஷத்தில் தசாச்சித்ரம் பாபக்ருஹகோசரமுண்டாகில் ஆயுஸு கிலேசம்.

முன் சொன்னப்போல் சனிமுதல் ராஹு மட்டும் கொண்டு விஷதி[த]ஷ்டமும், குஜனைக்கொண்டு சஸ்த்ரபயமும் ஸந்நிபாதபீடை யும் சொல்லவும்.

Fol. 130 (a) contains some unrelated astrological matter.

R. No. 8077 (a).

अनभायोगफलम्—द्राविडव्याख्यायुतम्

ANABHĀYOGAPHALAM with a Tamil Commentary

Foll. 130(a)–134(a); 50 granthas.

Begins on fol. 130 (a) of the manuscript described under R. No. 8044.

Similar to the work described under No. D. 13694.

Complete, but the penultimate leaf is wanting.

Beginning :

द्वितीये द्वादशे पार्श्वे द्वये ग्रहसमन्विते ।

सुनभायोगे तु संजातस्त्वनभायोग इतीरितः ॥

अनभायोगफलम्—

गुणवान् व्याधिरहितः पृथुलख्यातिसमन्वितः ।

महाकीर्तिर्महाधीरः सुकुमारो महादृढः ॥

विषयासक्तचित्तस्तु सुखभुक् धनवाहनः ।
बहुपुत्रार्थसंयुक्तो राजभाग्यसमन्वितः ॥
स्वोच्चपूर्णफलं ब्रूयात् स्वत्रिकोणस्तथाविधः ।
मित्रक्षेत्रे स्व[तु] पादोनं समक्षेत्रे तदर्धकम् ॥
पादं फलं शत्रुगेहे शून्यनीचस्थगे तथा ।
मनिरो दुःखितो नस्वः प्रेष्यः स्यात्परदारितः ? ॥

லக்னாதிபதி ஸ்வக்ஷேத்ரத்திலிருக்க பித்ருஸ்தானாதிபதி த்ரிஷடாயம் ஏற அவனை வ்யயாதிபதி பார்க்க அவன் பித்ருதனம் அநுபவிக்கமாட்டான்.

End :

வியாழனுக்கு 5ல் சுபர் இருக்க, ஜென்மலக்னத்துக்கு 5ல் சுபர் இருக்க இவனுக்கு 26லும், 28லும், முப்பத்திரண்டிலும்......... ஏற நோக்க, 5க்குடையவனையும், காரகனையும் சுபர் சேர நோக்க, லக்கினத்தான் 12ல் ஏற இவன் புத்திரனுக்கு அல்பாயுசு.

Fol. 134 (b) is blank. Foll. 135–137 contain the horoscope of one Annasami. Foll. 138–144 are blank.

(R. Nos. 8078–8088 in one bundle)

Palm leaf ; 20 4x4.7 c.m. ; Foll. 58 ; Lines. 9-11 on a page ; Grantha ; good.

Presented in 1948–49 by Sri Mṛdangam Subbaiyer, Chattapuram Village, Kalpathi, Palghat.

R. No. 8078.

राममङ्गलम्

RĀMAMAṄGALAM—

Foll. 2 (*a*)—3 (*b*) ; 20 granthas.

Begins on fol. 2 (a); The other works herein are:— Śrīrāmastotram : fol. 4 (a); Rāmāyaṇasaṅgrahaḥ fol. 5 (a) ; Rāmamānasapūjā : Fol. 11 (a) ; Rāmastavarājaḥ : Fol. 16 (a) ; Rāmahṛdayam: Fol. 22 (a); Rāmakavacaḥ 30 (a) ; Gāyatrīrām āyaṇam: fol. 33(a) ; Ādityahṛdayam: fol. 35(b); Pañcāyudhastotrom : fol. 40 (a) ; Śrīkṛṣṇadvādaśanāmastotram: fol. 41 (a); Lakṣmīdvādaśanāmastotram: fol. 42 (a) ; Garuḍadvādaśanāmastotram: fol.

42 (a); Bhāratasāvitrī: fol. 44 (a); Nadīstotram: fol. 50 (a); Gaṅgāstotram: fol. 52 (b); Rāmāyaṇaślokās (cirañjīvirā māyaṇam.): fol. 55 (a) and Rāmakṛṣṇaśivastotram: fol. 56 (a).

Same work as that described under R. No. 8057.

Complete.

R. No. 8078 (a)

श्रीरामस्तोत्रम् by हनुमत्

SRĪRĀMASTOTRAM by HANUMAT

Fol. 4; 13 granthas.

Begins on fol. 4 (a) of the manuscript described under the previous number.

Same work as that described under R. No. 8045

Complete.

R. No. 8079.

रामायणसङ्ग्रहः

RĀMĀYAṆASAṄGRAHAḤ

Foll. 5 (a)—10 (b); 70 granthas.

Begins on fol. 5 (a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8044.

Complete.

R. No. 8079 (a)

राममानसपूजा

RĀMAMĀNASAPŪJĀ

Foll. 11 (a)—15(b); 65 granthas.

Begins on fol. 11 (*a*) of the manuscript described under R. No. 8078.

Same work as that described under D. No. 5800.

Incomplete.

R. No. 8079 (b)

रामस्तवराजः

RĀMASTAVARĀJAḤ

Foll. 16 (a)—22 (a) ; 70 granthas.

Begins on fol. 16 (a) of the manuscript described under R. No. 8078.

Same work as that described under D. No. 10303.

Wants the beginning.

R. No. 8079 (c)

रामहृदयम्

RĀMAHṚDAYAM

Foll. 22 (a)—29 (b) ; 90 granthas.

Begins on fol. 22 (a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8048, with a different beginning as given below:

Complete.

Beginning :

शुक्लां शान्तये ॥

विद्युत्कोटिदिवाकरप्रतिभटी तुङ्गोरुपीनस्तनी
ब(द्धवाश्चे)[द्धार्के]न्दुकिरीटहाररशनामञ्जीरसंशोभिता ।
बिभ्राणा करपङ्कजैर्जपवटीं पाशाङ्कुशौ पुस्तकं
दृश्यान्नो जगदीश्वरी त्रिणयना पद्मे निषण्णा शुभा ॥

कल्याणानां निदानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोस्सपदि परपदप्राप्तये प्रस्थितस्य ।
विश्रान्तिस्थानमेकं कविवरवचसां जीवनं सज्जनानां
बीजं धर्मद्रुमेभ्यः प्रभवतु भवतां भूतये रामनाम ॥

यस्मिन् रामे स्वप्रकाशे जगदेतच्चराचरम् ।
सृष्टिस्थित्यन्तमाप्नोति तं भजे गुरुरूपिणम् ॥

य: पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयस्-
संजातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः।
निश्शङ्कं हतराक्षसः पुनरगात् ब्रह्मत्वमाद्यं परं
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे॥
यथा हि चाक्ष्णोर्भ्रमतोर्गृहादिकं विनष्टदृष्टेर्भ्रमतीव दृश्यते।
तथैव देहेन्द्रियकर्तुरात्मनः कृतं परेशस्य जनो विमुह्यति॥

R. No. 8079 (d)

रामकवचम्

RĀMAKAVACAM

Foll. 30 (a)–33 (a); 45 granthas.

Begins on fol. 30 (*a*) of the manuscript described under R. No. 8078.

Same work as that described under D. No. 7011.

Wants a small portion in the beginning.

Incomplete.

Beginning:

पञ्चपूजा, लं पृथिव्यात्मने गन्धं समर्पयामि। (अ)[हं] आकाशात्मने पुष्पाणि समर्पयामि। (रं)[यं] वा(युवा) [य्वा] त्मने धूपं समर्पयामि। (नं)[रं] अ(ग्निया)[ग्न्या]त्मने दीपं दर्शयामि। (अं)[वं]अमृतात्मने अमृत(ग)[ख]ण्डं निवेदयामि। सं सर्वात्मने सर्वोपचारान् समर्पयामि।
श्रीकौशिक उवाच—

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्।
जानकीलक्ष्मणोपेतं जटामकुटमण्डितम्॥

R. No. 8079 (e)

गायत्रीरामायणम्

GĀYATRĪRĀMĀYAṆAM

Foll. 33 (a)–35 (b); 25 granthas.

Begins on fol. 33 (a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 4800(j).

Complete.

R. No. 8080.

आदित्यहृदयम्

ĀDITYAHṚDAYAM

Foll. 35 (b)-39 (b) ; 45 granthas.

Begins on fol. 35(b) of the manuscript described under R. No. 8078.

Same work as that described under D. No. 17072.

Complete.

R. No. 8080 (a)

पञ्चायुधस्तोत्रम्

PAÑCĀYUDHASTOTRAM

Foll. 40 (a)-41 (a) ; 15 granthas.

Begins on fol. 40 (a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8052.

Complete.

R. No. 8080 (b)

कृष्णद्वादशनामस्तोत्रम्

KṚṢṆADVĀDAŚANĀMASTOTRAM

Foll. 41 (a)-42 (a) ; 9 granthas.

Begins on fol. 29(a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8053.

Complete.

R. No. 8080 (c)

लक्ष्मीद्वादशनामस्तोत्रम्

LAKṢMĪDVĀDAŚANĀMASTOTRAM

Fol. 42 ; 8 granthas.

Begins on fol. 42 (a) of the manuscript described under R. No. 8078.

Same work as the described under R. No. 8054.

Complete.

R. No. 8080 (d)

गरुडद्वादशनामस्तोत्रम्

GARUḌADVĀDAS'ANĀMASTOTRAM

Foll. 42 (b)–43 (b) ; 12 granthas.

Begins on fol. 42 (b) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8055.

Complete.

R. No. 8080 (e)

भारतसावित्री

BHĀRATASĀVITRĪ

Foll. 44 (*a*)–49 (*b*) ; 70 granthas.

Begins on fol. 44 (a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8061.

Incomplete. The portion from विराटश्चोत्तरश्चैव to दिनं तथा is wanting.

Fol. 50 (a) contains a portion of the end of Mārkaṇḍeya-stotra.

R. No. 8080 (f)

नदीस्तोत्रम्

NADĪSTOTRAM

Foll. 50 (a)–52 (b) ; 25 granthas.

Begins on fol. 50 (a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8064.

Complete.

R. No. 8080 (g)

गङ्गास्तोत्रम्

GAṄGĀSTOTRAM

Foll. 52 (b)—54 (b); 20 granthas.

Begins on fol. 52 (b) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8064 (a).

Complete.

R. No. 8080 (h)

रामायणश्लोकाः—चिरञ्जीविरामायणम्

RĀMĀYAṆAŚLOKĀḤ-CIRAÑJĪVIRĀMĀYAṆAM

Foll. 55 (*a*)—56 (*a*); 16 granthas.

Begins on fol. 55 (a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8056.

Complete.

R. No. 8080 (i).

रामकृष्णशिवस्तोत्रम्

RĀMAKṚṢṆAŚIVASTOTRAM

Foll. 56 (a)-58 (a); 25 granthas.

Begins on fol. 56 (a) of the manuscript described under R. No. 8078.

Same work as that described under R. No. 8065 with an additional stanza in the end, as given below:—

End:

इन्दीवरेण नयनं मुखमम्बुजेन
कुन्देन दन्तमधरं नवपल्लवेन ।

अङ्गानि चम्पकदलैश्च विधाय वेधाः
कान्ते कथं रचितवानुपलेन चेतः ॥

Fol. 58 (b), contains some verses taken from the Purāṇas.

R. No. 8081.

Palm leaf; 36.2x4.7 c.m. Foll. 130; Lines: 10-16 on a page; grantha; good; 4200 granthas.

Presented in 1948-49 by Sri Sabhapativadhyar, Lakshminarayanapuram Village, (P.O.) Kalpathi, Palghat.

सिद्धान्तकौमुदीव्याख्या–तत्त्वबोधिनी

SIDDHĀNTAKAUMUDĪVYĀKHYĀ-TATTVABODHINĪ

Same work as that described under D. No. 1434. In this work, the Pūrvārdha breaks off in the sūtra स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्। (४–१–५४) in Strīpratyayaprakaraṇa.

Foll. 1-4 and 26 are blank.

R. No. 8082.

Palm leaf; 44.7x5.8 c.m. Foll. 118; Lines: 10-14 on a page; grantha; injured; 4,500 granthas.

Presented in 1948-49 by Sri Sabhapativadhyar Laksminarayanapuram, (P.O.) Kalpathi, Palghat.

ब्रह्मसूत्रशाङ्करभाष्यम्

BRAHMASŪTRAŚAṄKARABHĀṢYAM

Same work as that described under D. No. 4659. The 1st Adhyāya and the 1st Pāda of 2nd Adhyāya are complete and the 2nd Pāda of 2nd Adhyāya incomplete.

Foll. 1, 82(b) and 111(b) are blank.

(R. Nos. 8083-8087(e) in one bundle)

Palm leaf; 23.8x2.9 c.m; Foll. 142; Lines: 5-7 on a page; grantha; good.

Presented in 1948-49 by Sri Anjaneya Sastry, 143, Poonamallee High Road, Chetpet.

R. No. 8083.

देवीमाहात्म्यम्

DEVĪMĀHĀTMYAM

Foll. 70 (a)–133 (b); 700 granthas.

Begins on Fol. 70 (a). The other works here in are :—

Lalitāsahasranāmastotram: fol. 6 (a); Gāyatrībhujaṅgam: fol. 42 (a); Gāyatrīkavacam : fol. 44 (a); Gāyatrīmālāmantraḥ : Fol. 48 (a); Turīyagāyatrī: fol. 52 (a); Gāyatrīstotram: fol. 53 (a); Gāyatryaṣṭottaram: fol. 57 (b); Devīkavacam : fol. 61 (a); Prāṇapratiṣṭhāmantraḥ : fol. 68 (a); and Caṇḍikāhṛdayam: fol. 134(a).

Contains Adhyāyas 5, 8 to 13, the beginning portion of 6 and the end of 7.

Same work as that described under D. No. 2444, with a different beginning, readings and some additional stanzas and without Ṛṣyādinyāsa etc.

Beginning :

ओं तपस्यन्तं महात्मानं मार्कण्डेयं महामुनिम् ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥

जैमिनिरुवाच :—

पुरा मन्वन्तरे स्वामिन् महितेन प्रकाशितः ।
सावर्णिको नाम मनुर्वसुसंज्ञस्त्वया मुने ॥
तदुत्पत्तिं महायोगिन् सर्वज्ञ वद विस्तरात् ।
परोपकारहेतोस्त्वं तथा विप्रणतस्य मे ॥
मार्कण्डेय महाप्राज्ञ सर्वशास्त्रविशारद ।
श्रोतुमिच्छाम्यशेषेण देवीमाहात्म्यमुत्तमम् ॥
साधु पृष्टस्त्वया ब्रह्मन् वक्ष्यामि हितकाम्यया ।

मार्कण्डेय उवाच :—

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥

R. No. 8083 (a)

चण्डिकाहृदयम्

CAṆḌIKĀHṚDAYAM

Foll. 134(a)–142(b) ; 80 granthas.

Begins on fol. 134 (a) of the manuscript described under R. No. 8044.

Same work as that described under R. No 323(a) with slightly different readings, as given below.

Beginning :

अथातस्संप्रवक्ष्यामि विस्तरेण यथातथम् ।
चण्डिकाहृदयं गुह्यं शृणुष्वैकाग्रमानसः ॥

ओं ह्रां ह्रीं हुं श्रीं क्लीं जय ज्वालाचामुण्डि चण्डिके त्रिदशमकुट-संघट्टचरणारविन्दे सावित्रीगायत्रीसरस्वतीमहा(हि)[ही]कृतहारिणि भैरवरूप-धारिणि प्रकटितदंष्ट्रोग्रवदने घोरे घोरनयने नयने(?) ज्वल ज्वालासहस्रपरिवृते ओं श्रीं ह्रीं क्ष्रूं सर्वप्राणसंहारकारिणि हुं फट् स्वाहा ॥

ओं मातर्मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृतरक्तबीजदनुजे.... निसुंभापहे
सुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

अष्टौभुजाङ्गीं महिषस्य मर्दिनीं सशङ्खचक्रां शरचापधारिणीम् ।
तां दिव्ययोगीं सहजातवेदसीं दुर्गां सदा शरणमहं प्रपद्ये ?॥

महिषमस्तकनृत्तविनोदिनीं स्फुटरणन्मणिनूपुरमालिकाम् ।
जननरक्षणमोक्षविधायिनीं(जयति)[जगति] सुम्भनिसुम्भनिषू-
दिनीम् ॥

End :

य इदं शृणुयान्नित्यं त्रिसन्ध्यं यः पठेन्नरः ।
(र)[ऋ]णकोट्यापहरणं(?) रोगदारिद्र्यनाशनम् ॥

सर्वसिद्धिमवाप्नोति सर्वकामानि सर्वदा ।
भक्तानन्दकरीं देवीं परब्रह्मस्वरूपिणीम् ॥

इष्टकामेश्वरीं सिद्धां सर्वशक्तिस्वरूपिणीम् ।
अष्टादिदशपीठस्थां त्रिपुरामधिदेवताम् ॥
:न्दे विश्वेश्वरीं देवीं भुक्तिमुक्तिफलप्रदाम् ।
एतत्सप्तशतीध्यानं सर्वशक्तिकरं तथा ॥
रसं रसायनं सिद्धे गुलिकाञ्जनसिद्धिदम् ।
पादुकायुगलं सिध्येत् खड्गसिद्धिकरं तथा ॥
सिद्धं सारस्वतं सिद्धं मन्त्रसिद्धिकरं तथा ।
ग्रहपीडोपशमनं सर्वसङ्कटनाशनम् ॥
सौन्दर्यं राजसम्मानं पुत्रपौत्राभिवृद्धिदम् ।
ऐश्वर्यमष्टसिद्धिञ्च योगित्वं कामरूपिताम् ॥
सदा संनिहिता लक्ष्मी[:] चण्डिका मम देवता ।
स्मरेन्नित्यं प्रयत्नेन षण्मासात्प्राप्यते पुमान् ॥
महाभयापहरणं शत्रुक्षयकरं तथा ।
अचलां श्रियमाप्नोति सर्वव्याधिविनाशनम् ।
अन्ते स्वर्गञ्च मोक्षञ्च सत्यमेतन्न संशयः ॥
चण्डिकायै नमः ॥

R. No. 8084.

ललितासहस्रनामस्तोत्रम्

LALITĀSAHASRANĀMASTOTRAM

Foll. 6 (a)–41 (b); 375 granthas.

Begins on fol. 6 (a) of the manuscript described under R. No. 8083.

Same work as that described under D. No. 9183, with a different colophon. The portion relating to Ṛṣi, Devatā etc. has been given differently in the middle of the work.

Complete.

Foll. 1-5 are blank.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

पूर्वपीठिका—अगस्त्य उवाच—

अश्वानन महाबुद्धे सर्वशास्त्रविशारद ।
कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥

* * * *

Fol. 12 (a);

अस्य श्रीललितादिव्यसहस्रनामस्तोत्रमहामन्त्रस्य वशिन्यादिवाग्देवता ऋषयः, अनुष्टुप्छन्दः, ललितापरमेश्वरी देवता । श्रीमद्वाग्भवकूटेति बीजम्, मध्यकूटेति शक्तिः, शक्तिकूटेति कीलकम्, मूलप्रकृतिरिति ध्यानम् । मूलमन्त्रेणाङ्गन्यासकरन्यासं कुर्यात् । मम श्रीललितात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशपुष्पबाणचापाम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥

ध्यायेत् पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं
हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मां वराङ्गीम् ।
सर्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्तमूर्तिं सकलसुरनतां सर्वसम्पत्प्रदात्रीम ॥

सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरां जपविधौ स्मरेदम्बिकाम् ॥

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुण्डसम्भूता देवकार्यसमुद्यता ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसंवादे श्रीललितारहस्यनामसहस्रफलनिरूपणं नाम तृतीयोऽध्यायः ॥

॥ श्रीललितारहस्यनामसाहस्रस्तोत्रं सम्पूर्णम् ॥

R. No. 8085.

गायत्रीभुजङ्गम्

GĀYATRĪBHUJAṄGAM

Foll. 42 (a)–43 (b) ; 20 granthas.

Begins on fol. 42 (a) of the manuscript described under R. No. 8083.

Same work as that described under D. No. 9414, but with a different colophon, as given below.

Complete.

Colophon :

॥ इति श्रीब्रह्मतान्त्रिके गायत्रीभुजङ्गं सम्पूर्णम् ॥

R. No. 8086.

गायत्रीकवचम्

GĀYATRĪKAVACAM

Foll. 44 (a)–47(b) ; 30 granthas.

Begins on fol. 44 (a) of the manuscript described under R. No. 8083.

Same work as that described under D. No. 6186, with slight differences in the beginning, an additional stanza in the end and a different colophon, as given below.

Complete.

Beginning :

अस्य श्रीगायत्रीकवचस्तोत्रमहामन्त्रस्य, ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुस्सामाथर्वाणि च्छन्दांसि, परब्रह्मस्वरूपिणी पराशक्तिर्देवता, ओं तत्सवितुः बीजम्, ओं भर्गो देवस्य शक्तिः, ओं धियो यो न इति कीलकम्, मम गायत्री सावित्री सरस्वतीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ध्यानम्—

रक्तश्वेतसुवर्णनीलवदनैर्युक्तां त्रि(णे)[ने]त्रोज्ज्वलां
मुक्तायुक्तमणिस्तुते ? मणिमयैर्युक्तां कुमारीमिमाम् ।

गायत्रीं कमलासनां करतलैश्शङ्खाब्जयुग्मं करैः
पद्माक्षीं च वरस्रजञ्च दधतीं हंसाधिरूढां भजे ॥

प्रातःकालं-पञ्चपूजा ।

मध्याह्नकालं—

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैः
युक्तामिन्दुनिबद्धरत्नमकुटां तत्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशां शुभ्रं कपालं गुणं
शङ्खं चक्रगदारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

पञ्चपूजा ।

सायङ्कालम्—

कृष्णां ताक्ष्यधिरूढां परिणतहृदयां कृष्णमाल्याम्बराढ्यां
सर्वाकल्पोज्ज्वलाङ्गीं मृगमदललितां हेमपद्मासनस्थाम् ।
हस्तैश्शङ्खं रथाङ्गं जलजमपि तथा स्फाटिकामक्षमालां
बिभ्राणां सायुधान्तां सरसिजवदनां सरस्वत्याभिमुख्याम् ? ॥
गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ।
ब्राह्मे सन्ध्या तु मे पश्चादुत्तरां मे सरस्वती ॥

End :

जपारम्भे तु हृदयं जपान्ते कवचं पठेत् ।
गोस्त्रीब्राह्मणमित्रादिद्रोहाद्यखिलपातकैः ॥
मुच्यते सर्वपापेभ्यः परं ब्रह्मा(धि)[व]गच्छति ।
परब्रह्मा(धि)[भि]गच्छत्यों हतां (?) नम इति ॥
सुरभिज्ञानचक्रश्च योनिकूर्मोऽथ पङ्कजम् ।
लिङ्गनिर्याणमुद्रा च इत्येते कवचमुद्रिकाः ॥

Colophon :

कवचं समाप्तम् ॥

R. No. 8087.

गायत्रीमालामन्त्रः

GĀYATRĪMĀLĀMANTRAḤ

Foll. 48 (a)-51 (a); 35 granthas.

Begins on fol. 48(a) of the manuscript described under R. No. 8083.

Similar to the work described under D. No. 6211.

Complete.

Beginning:

अस्य श्री गायत्रीमालामहामन्त्रस्य, वसिष्ठविश्वामित्रकाश्यपा ऋषयः, गायत्री सावित्री सरस्वती च्छन्दः, परब्रह्मस्वरूपिणी गायत्री देवता, आं बीजं, ईं शक्तिः, ॐ कीलकम्, मम ब्रह्मलोकावाप्त्यर्थे जपे विनियोगः।

ध्यानम्——

रक्ता कुमारी गायत्री साक्षसूत्रकमण्डलु(म्)[:]।
हंसारूढा ब्रह्मरूपी भू ऋग्वेदसमन्विता॥
सावित्री युवती शुक्ला शूलिनी वृषभध्वजा।
रुद्रदेवा भुवर्लोका यजुर्वेदसमन्विता॥
वृद्धा सरस्वती कृष्णा चक्रिणी गरुडध्वजा।
विष्णुदेवा सुवर्लोका सामवेदसमन्विता॥

पञ्चपूजा:——

ओं भूर्लोक भुवर्लोक सुवर्लोक महर्लोक जनोलोक तपोलोक सत्यलोकाप्सरोलोकान् ज्योतिर्लोकानप्सरःकिन्नरामृतं ब्रह्म त्रैलोक्यं तद्वैकुण्ठशिवकैलासदेवनक्षत्रसूर्यचन्द्रा इन्द्रादिदिक्पालनवग्रहाष्टसहस्राष्टादशपुराणान्यतलवितलसुतलरसातलतलातल महातल पाताल मण्डलाकारादि भुवमण्डलपर्यन्तं नानाविधाकारस्थावरजङ्गम सकृत ? देवदैत्यमनुष्यतिर्यगादि नागकीटपतङ्गस्वस्थविश्वरूपिणी आब्रह्मादि पिपीलिकान्तं ब्रह्मगायत्र्या सकलाभरणसंयुतं ओं भूर्भुवस्सुवस्स्वाहा॥

End:

ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वास्त्रस्वरूपिणे ? ज्वल ज्वल प्रज्वल प्रज्वल ज्वालामालिने ? स्वाहा मां रक्ष रक्ष मम शत्रून् भक्षय भक्षय हुं फट् स्वाहा॥

R. No. 8087(b)

तुरीयगायत्रीमन्त्रः

TURĪYAGĀYATRĪMANTRAḤ

Foll. 51 (b)–52 (a) ; 8 granthas.

Begins on fol. 51 (b) of the manuscript described under R. No. 8083.

Similar to the work described under D. No. 6326.

Incomplete.

Beginning and End :

अस्य श्रीतुरीयगायत्रीमहामन्त्रस्य, अथर्वणपुत्रो विमल ऋषिः, तुरीयगायत्रीच्छन्दः, परमात्मा देवता, ओं परो रजसीति बीजम्, सावदो-मिति शक्तिः, प्रापतोमिति कीलकम्, मम तुरीयगायत्रीप्रीत्यर्थे जपे विनियोगः । ओं (पराक्) [परो] ज्ञानात्मने अङ्गुष्ठाभ्यां नमः, (रजसे) [रजिसि] ऐश्वर्यात्मने तर्जनीभ्यां स्वाहा, सावदों शक्त्यात्मने मध्यमाभ्यां वषट्, मावलाय अनामिकाभ्यां हुम्, प्रापतों कनिष्ठिकाभ्यां वौषट्, परो रजसि सावदों करतलकरपृष्ठाभ्यां फट् । एवं हृदयादिन्यासः ।

ध्यानम्——

यद्देवासुरपूजितां अरुणनिभां ? चन्द्रार्कतारान्वितां
पुन्ना(गां) भु[गाम्बु]जनागपुष्पवकुलैर्व्यासादिभिश्चार्चिताम् ।
नित्यं ध्यानसमाधियोगकरणां कालाग्निरुद्रोपमां
तत्संहारकरीं नमामि सततं पातालषष्ठं सुखम् ॥

पञ्चपूजाः——

Fol. 52 (b) is blank.

R. No. 8087(b).

गायत्रीस्तोत्रम्

GĀYATRĪSTOTRAM

Foll. 53 (a)–57 (a) ; 50 granthas.

Begins on fol. 53(a) of the manuscript described under R. No. 8083.

Similar to the work described under D. No. 9422.

Forms part of Gāyatrīrahasya in Rudrayāmala. The concluding stanzas bring out the efficacy of this Stotra.

Complete.

Beginning :

भैरव उवाचः—

शृणु देवि प्रवक्ष्यामि गायत्रीतत्त्वमुत्तमम् ।
स्तोत्रमन्त्रमयं देव्याः सर्वतन्त्रेषु गोपितम् ॥ २ ॥

अङ्गं पञ्चकमीशानी ? महापातकनाशनम् ।
पुण्यप्रदं वेदसारं सर्वतत्त्वोत्तमोत्तमम् ॥ २ ॥

परमात्माभिधस्यास्य स्तोत्रस्यास्ति ऋषिश्शिवः ।
त्रिष्टुप्छन्दो महादेवी त्रिपदा देवता स्मृता ॥ ३ ॥

तारं बीजं शिरश्शक्तिः खगः कीलकमीश्वरम् ।
धर्मार्थकाममोक्षार्थे जपे ? विनियोग इति स्मृतः ॥ ४ ॥

चतुर्भुजामर्कसहस्रकोटित्रिलोचनां हारकिरीटशोभिताम् ।
चतुर्भुजाङ्कोपगतां महोज्ज्वलां वेदेश्वरीं पञ्चमुखीं भजाम्यहम् ॥ ५ ॥

विविधमणिमयूखस्फीतकेयूरहारप्रकरणकनकाञ्चीकिङ्किणीकङ्कणाढ्याम् ।
सकलभुवनरक्षासृष्टिसंहारकर्त्रीं निगमपरमवेद्यामाश्रये वेदधात्रीम् ॥ ६ ॥

प्रणवमनुराजमौलि यदि वेद ।
स्थिरवेदसारमाद्यं वरेण्यं प्रजपेत् ॥ ७ ॥

शकाञ्जपेद्याश्च विहाय शङ्कां कङ्कालमालाभरणां निशीथे ।
कृशानुभानुप्रभया समेतां विमानचारी स भवेत्समानम् ॥ ८ ॥

End :

देवि त्रैलोक्यमातर्लघुकुचकुसुमं पद्ममालायुधाङ्के
नानारत्नप्रभाढ्ये त्रिनयनविलसत्सूर्यचन्द्राग्निबिम्बे ।
पीठे श्रीपञ्चवक्त्रे वलयमणिनिभाभासुरे(न्मा)[र्म]मराढ्ये
श्रीमन्नीलोत्पलाभे त्रिपदि वरकरे वेदमातः प्रसीद ॥ २८ ॥

इति स्तोत्रं पुण्यं परममनुमयं तत्त्वनिहितं
पठेद्यो गायत्र्या निशि(का जं ने) च विजने वापि सततम् ।
स वेदान्तस्मार्तागमपुराणार्थनिपुणो
लभेल्लक्ष्मीं प्रान्ते परमपदवीं मन्त्रकविधिम् ॥ २९ ॥

इतीदं देवि पञ्चाङ्गं सर्वस्वं सारमुत्तमम् ;
गायत्र्यास्तत्त्वमीशानी चतुर्वेदरहस्यकम् ॥ ३० ॥

अदातव्यमभक्ताय कुशीलाय दुरात्मने ।
अन्यशिष्याय नो देयं दत्वा निरयमाप्नुयात् ॥ ३१ ॥

शिष्याय शुद्धमनसे गुरुभक्ताय पार्वति ।
दीक्षिताय कुलीनाय देयं साधकसत्तमैः ॥ ३२ ॥

इतीदं देवि गायत्र्याः स्तवं मम रहस्यकम् ।
गुह्यं गोप्यं महातत्त्वं गोपनीयं मुमुक्षुभिः ॥ ३३ ॥

Colophon :

॥ इति रुद्रयामले गायत्रीरहस्ये गौरीशङ्करसंवादे गायत्रीस्तोत्रं सम्पूर्णम् ॥

R. No. 8087(c).

गायत्र्यष्टोत्तरशतनामस्तोत्रम्

GĀYATRYAṢṬOTTARAŚATANĀMASTOTRAM

Foll. 57 (b)–60 (b) ; 35 granthas.

Begins on fol. 57 (b) of the manuscript described under R. No. 8083.

Same work as that described under D. No. 3829, with differences in the end and colophon.

Complete.

Beginning :

श्रीराम उवाच —

विश्वामित्र महाप्राज्ञ गायत्रीमन्त्रपारग ।
श्रोतुमिच्छामि तत्त्वेन गायत्र्यष्टोत्तरं शतम्

विश्वामित्र उवाच—

साधु पृष्टं त्वया प्राज्ञ रघुवंशसमुद्भव ।
गायत्र्याश्चैव साविव्याः सरस्वत्यास्तपोधन ॥

शतमष्टोत्तरं नाम शृणु तत्त्वेन सांप्रतम् ।
पठतां पातकहरमज्ञानतिमिरापहम् ॥

गायन्तं त्रायते यस्मात् गायत्रीत्यभिधीयते ।
अतः शृणु महाबाहो सर्वान् कामानवाप्स्यसि ॥

अस्य श्रीगायत्रीनामस्तोत्रमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुस्सामाथर्वाणि छन्दांसि, गायत्री साविवी सरस्वती देवता, ओं बीजम्, भर्गः शक्तिः, यात् कीलकम्, गायत्रीसावित्रीसरस्वतीप्रसादसिद्ध्यर्थे जपे विनियोगः । तत्सवितुः ब्रह्मात्मने अङ्गुष्ठाभ्यां नमः । एवं हृदयादि षडङ्गन्यासः । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम्—

पञ्चवक्त्रां त्रिनयनां बालेन्दुमकुटोज्ज्वलाम् ।
वन्दे समस्तजननीं देवीं दशभुजोज्ज्वलाम् ॥

ओं तरुणादित्यसङ्काशा सहस्रनयनोज्ज्वला ।
विचित्रमाल्यावसना तुहिनाचलसंस्थिता ॥

End :

ज्योत्स्नातपानुलिप्ताङ्गी महामारुतवीजिता ।
सर्वमन्त्राश्रया धेनुः पापघ्नी परमेश्वरी ॥

नमस्तेऽस्तु महालक्ष्मीर्महासम्पत्प्रदायिनि ।
नमस्ते करुणामूर्ते नमस्ते भक्तवत्सले ॥

एतदष्टोत्तरशतं देव्याः पातकनाशनम् ।
गायत्रीं प्रजपेद्यस्तु एतैरष्टोत्तरैर्नरः ॥

तस्य पुण्यफलं वक्तुं ब्रह्मणापि न शक्यते ।
प्रातः काले तु मध्याह्ने सायाह्ने वा द्विजोत्तमाः ॥

ये पठन्ति फले केऽस्मिन् नाम्नामष्टोत्तरं शतम् ।
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ॥
दिने दिने पठेद्यस्तु नाम्नामष्टोत्तरं शतम् ।
शापानुग्रहसामर्थ्यं लभते नात्र संशयः ॥
आत्मज्ञानञ्च लभते देहान्ते मुक्तिमाप्नुयात् ॥

Colophon:

इति विश्वामित्रप्रोक्तं अष्टोत्तरशतं समाप्तम् ।

R. No. 8087(d).

देवीकवचम्

DEVĪKAVACAM

Foll. 61 (a)–68 (a) ; 70 granthas.

Begins on fol. 61 (a) of the manuscript described under R. No. 8083.

This is one of the Navāṅgas to be gone through before commencing a religious reading of the Devīmāhātmya which forms part of the Mārkaṇḍeyapurāṇa treating of the greatness of Devī or Kālī.

Complete.

Beginning:

अस्य श्रीदेवीकवचस्तोत्रमहामन्त्रस्य मार्कण्डेयब्रह्मेन्द्रादय ऋषयः, आद्यन्तावनुष्टुप्छन्दः, मध्ये विराट्छन्दः त्रिष्टुप् जगती छन्दांसि, शक्तित्रयस्वरूपिणी दुर्गादेवी देवता, दुं बीजं, स्वाहा शक्तिः, महामायाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ध्यानम्—

सौवर्णाम्बुजमध्यगां त्रिणयनां सौदामिनीसन्निभां
शङ्खं चक्रवराभयञ्च दधतीमिन्दोः कलां बिभ्रतीम् ॥

ग्रैवेयाङ्गदहारकुण्डलधरामाखण्डलाद्यैः स्तुतां
ध्यायेद्विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम् ॥

शङ्खासिचापशरविन्नकरां त्रिणेत्रां तिग्मेतरांशुकलया विलसत्किरीटाम् ।
सिंहस्थितां ससुरसिद्धनुताञ्च दुर्गां दूर्वानिभां दुरितवर्गहरां नमामि ॥

महालक्ष्मी(ः) महाकाळी महाकन्या सरस्वती ।
दशाष्टकभुजा देवी सुम्भासुरनिबर्हिणी ॥

ब्राह्मी (म)[मा]हेश्वरी चैव कौमारी वैष्णवी तथा ।
(व)[वा]राही चैव माहेन्द्री चामुण्डा परमेश्वरी ॥

शिवदूती कालरात्री शक्तिश्च परमेश्वरी ।
यानन्दा मधुकैटभप्रमहि(षा)[षी] या चण्डमुण्डार्दिनी

या च स्यान्महिषासुरक्षयकरी या रक्तबिन्दुग्रहा ।
या सा सुम्भनिसुम्भासैन्यमथनी या दैत्यनिर्मूलिनी
सा देवी मम रक्ष दक्षिणभुजा चण्डी जयत्वम्बिका ॥

मार्कण्डेय उवाच—

यद् गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥

ब्रह्मोवाच—

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तं शृणुष्व महामुने ॥

* * *

प्राच्यां रक्षतु माहेन्द्री चाग्नेय्यामग्निदेवता ।
दक्षिणे रक्ष वाराही नैरृत्यां खगधारिणी ॥

प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ।
उदीच्यां रक्ष कौबेरी ऐशान्यां शूलधारिणी ॥

ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा ।
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ॥
जया मे अग्रतः पातु विजया पातु पृष्ठतः ।
अजिता वामपार्श्वे तु दक्षिणे (व) [चा]पराजिता ॥

nd :

ब्रह्मणा निर्मितं यस्तु कवचं जपसन्निभम् ।
त्रिसन्ध्यं कीर्तयेद्भक्त्या समाप्नोति परां गतिम् ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके ॥
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥
देहान्ते च परं स्थानं यत्सुरैरपि दुर्लभम् ।
तत्पदं समवाप्नोति यावदाभूतसंप्लवम् ॥
नित्यत्वं समवाप्नोति महामायाप्रसादतः ।

Colophon :

इति श्रीमार्कण्डेयपुराणे देवीमाहात्म्ये देवीकवचं समाप्तम् ॥

R. No. 8087(e).

प्राणप्रतिष्ठामन्त्रः

PRĀṆAPRATIṢṬHĀMANTRAḤ

Foll. 68 (*b*)—69 (*b*). 27 granthas.

Begins on fol. 68 (b) of the manuscript described under R. No. 8083.

Similar to the work described under D. No. 6677.

Complete.

Beginning :

प्राणप्रतिष्ठामहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुस्सामाथर्वाणि छन्दांसि, सकलसृष्टिस्थितिसंहारकर्त्री प्राणशक्तिर्देवता । आं बीजं, ह्रीं शक्तिः, क्रों कीलकम्, प्राणप्रतिष्ठार्थे जपे विनियोगः । ओं अं कं खं गं घं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने आं अङ्गुष्ठाभ्यां नमः ।

End :

ध्यानम् —

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्च बाणान् ।
बिभ्राणासृक्कपालं त्रि(ण)[न]यनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

मूलमन्त्रम्—

आं ह्रीं क्रों यरलवशषसह्रों क्षं हंसस्सोऽहं मम प्राण इह प्राण मम जीव इह स्थितः। आं ह्रीं क्रों मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणप्राणवाक्पाणिपादपायूपस्थानि, त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रानीहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा। क्रों ह्रीं आं हंसस्सोऽहं स्वाहा। मां रक्ष रक्ष। इति दक्षिणहस्तेन हृदयमपि स्पृष्ट्वा दशवारं जपेत् ॥

हरिः ओम्

(R. Nos. 8088—8115 in one bundle)

Palm leaf; 21 x 2.9 c.m.; and 20.6 x 4.2 c.m.; Foll. 72; Lines: 5–7 in a page; Telugu; slightly injured.

Presented in 1948—49 by Sri Anjaneya Sastry, 143, Poonamalle High Road ,Chetpet.

R. No. 8088.

अष्टवर्गः-आन्ध्रटीकासहितः

ASṬAVARGAḤ with Telugu meaning

Foll. 2 (a)–3 (b) ; 15 granthas.

Begins on fol. 2(a); The other works herein are :—

Yantralakṣaṇam : fol. 10 (a); Triśūlinīyantram : fol. 11 (a); Kāmeśvarīyantram: fol. 12 (a); Cakraprayogamantraḥ: fol. 13 (a); Kuṇḍalinīdhyānam: fol. 15 (a); Śaktigaṇapatiyantram: fol. 17 (a); Jvālinīyantram: fol. 18 (a); Cidambaranaṭanacakram: fol. 18 (b); Cidambaranaṭanam (Tāṇḍavacakram): fol. 22 (a); Śivagāyatrī: fol. 25 (b); Pratyaṅgirāmūlamantraḥ: fol. 25 (b); Cidambara-

yantradhyānadvāradevatāḥ: fol. 26 (a); Sammelanacakram: fol. 27 (a); Dakṣiṇāmūrtimūlam (Aṣṭamūrtimūlamantrāḥ): fol. 33 (a); Cidambarapañcamūlacakram: fol. 36 (a); Pañcabrahmacakram: fol. 41 (b); Svarṇabhairavapañcakoṇapūjā: fol. 46 (a); Devyaṣṭottaram: fol. 48 (a); Ādhāraśaktilakṣaṇam: fol. 49 (b); Pallīpatanaphalam: fol. 50 (a); Jalavāstucakram: fol. 50 (b); Bhuvaneśvarīyantram: fol. 51 (a); Jvālinīyantram: fol. 52 (a); Sītācakram: fol. 52 (b); Āpaduddhāraṇayantram—Navagrahayantram: fol. 54 (a); Dakṣiṇāmūrtimūlamantram: fol. 55 (a); Sudarśanacakram. fol. 56 (b); Sūryasudarśana mūlamantram: fol. 57 (b); Devyarcanā: fol. 58 (a); Navakoṇayantram: fol. 60 (a); Bhadrakālīdhyānam: fol. 61 (a); Aṣṭabhairavadhyānam: fol. 62 (a); Pañcākṣarīyantram: fol. 64 (a); Subrahmaṇyadhyānam: fol. 65(a).

Similar to the work described under No. R. 371 (d).

Complete.

Fol. 1(a) is blank. Fol. 1 (b) contains the Māvilliṅgācāru's Śrāddhatithi.

Beginning :

अकारं पूर्वमेवं तु ककारश्चाग्निदेशके ।
चकारं दक्षिणे भागे टकारं नैर्ऋतौ दिशि ॥
तकारं पश्चिमे भागे पकारं वायुदेशके ।
यकारमुत्तरे भागे शकारमीशान्यमेव ॥
अष्टवर्गसमश्चैव अष्टपत्रे तु संलिखेत् ।
लकारमिन्द्रबीजं च रकारश्चाग्निबीजकम् ॥
हकारं यमबीजं च षकारं निर्ऋतिस्तथा ।
वकारं वरुणबीजश्च यकारं वायुबीजकम् ॥
सकारं (सोम)बीजश्च शकारश्चेशानबीजकम् ।
अष्टदिक्पालकं बीजं अष्टारं(च)समालिखेत् ॥

యేను రేకులబడి యేను రేకుల వ్రాసి
చతురంగుళంబులు సమితి జేసి
ఛాసిననొక్రటి పావకంబును రెండు
రెనమున రెండు త్రయోదశమున నాల్గు(?)

మనువులందు యేనుశరంబుల యూరు
యయిన సప్తకం బొనర నిల్పి (?)
యేకాక్షరంబున నెనిమిది లిఖియించి
......చ్చినది యర్ధంబు చేసి
అందులో నొకటిని గ్రహించి కరములందును
నిధులందు కళలయందును తినిగెటిముల(?)
తిథినికాయములను దశమిని పాడ్యమిని
షోడశచక్రమయ్యె.
ఇది షోడశచక్రం.

End :

अंशफलम्

नष्टो वृद्धिः श्रियश्चैव दहनो मरणचोरकम् ।
सन्तानं गोकुलं हन्ति नवांशकफलं भवेत् ॥

* * *

श्चावर्गा अपसव्यं तु द्वितीयं अरविंशकम् ?।
तृतीयं विशमित्याहु चतुस्थानं शं विसार्धमेव श ? ॥
पञ्चमं तु रिपुस्थानं लक्ष्मीस्थानं च षष्ठ(म)[क]म् ।
सप्तमं भोगमायुष्यं अष्टस्थानञ्च नष्टमम् ? ॥

Fol. 4 (a) contains some horoscopes; fol. 4 (b) is blank; fol. 5 (a) contains the Madhuravīrayasvāmi padyam; fol. 5 (b) is blank; fol. 6 (a) contains the Prāṇāhutimantra; fol. 6 (b) and 7 are blank; fol. 8 contains some Astrological matter and fol. 9 contains some horoscope.

R. No. 8089.

यन्त्रलक्षणम्

YANTRALAKṢAṆAM

Fol. 10 ; 8 granthas.

Begins on fol. 10(a) of the manuscript described under the previous number.

This deals with Yantras written on particular metals like gold, silver etc. for ensuring one's longevity.

Complete.

Beginning :

स्फाटिके सर्वदा मूर्तिः सौवर्णे शतवर्षके ।
रौप्ये द्वाविंशतिः प्रोक्तं ताम्रे द्वादशवर्षकम् ॥
तदर्धं भूर्जपत्रेषु मेदिन्यां याममात्रकम् ।
शतं जीव शरदो वर्धमानः इत्येभिः । निकमो भवति ? ॥

शतं दीर्घमायुः मरुति येमना वर्धयन्ति । शतमानमेव शतात्मानो भवन्ति । शतमनन्तं भवति । शतमिति शतं दीर्घमायुः । अग्ने यशस्विन् यशसेममर्पयेन्द्रावतीमपचितीमिहावह । अयं मूर्धा परमेष्ठी सुवर्चास्समानानामुत्तमश्लोकोऽस्तु । पश्यति पुत्रम् पश्यति पौत्रम् प्रप्रजया पशुभिर्मिथुनैर्जायते । यस्यैवं विदुषोऽग्निहोत्रञ्जुहोति । योचना ! एमा वेदा । शतमानं भवति शतायुः पुरुषश्शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति ॥

R. No. 8090.

त्रिशूलिनीयन्त्रम्

TRIŚŪLINĪYANTRAM

Foll. 11(a)—12 (a) ; 15 granthas.

Begins on fol. 11 (a) of the manuscript described under R. No. 8088.

Similar to the work described under D. No. 8118.

Complete.

Beginning :

शूलिनीपञ्चदलवर्णं प्रमथप्रज्ञां ? प्रतिकोणं एकैकवर्णं शूलि ? लिखेत् एवं द्वितीयं तृतीयं चतुर्थपञ्चमपङ्क्तिषु विलिखेत् ? । रेखाग्रे शूलं शूलाग्रे साध्यानाम ? विलिखेत् । कोष्ठमध्ये त्रिकोणेषु मायाबीजं ईकारं विलिखेत् । सम्भूय पञ्च पिश्चतु ? मायाबीजानि जाना भवन्ति ? ॥

End :

ह्रिं दु ज्वल ज्वल दुष्टग्रहशूलिनी हुं फट् स्वाहा ॥

R. No. 8091.

कामेश्वरीयन्त्रम्—आन्ध्रटिप्पणीसहितम् ।

KĀMEŚVARĪYANTRAM with Telugu Notes.

Foll. 12 (a)–13 (a) ; 8 granthas.

Begins on fol. 12 (a) of the manuscript described under R. No. 8088.

This work contains instructions relating to the drawing of the Yantra pertaining to the Kāmeśvarīmantra. The object of this is the punishment of the wicked.

Complete.

Beginning and End :

ओं नमो भगवति कामेश्वरी भगवति देवि श्रीः आकर्षय आकर्षय शीघ्रं स्वाहा ।

* * *

यथा राजकुले दुष्टा भवन्ति परिचारिणः ।
सेसून्यकारिघातं च कुर्वन्त्यहर्निशं सदा ? ॥
तथा कुर्यान्महायन्त्रं दुष्टमोहनसंज्ञकम् ।
मध्ये नाम च-त्य-तुलं वेष्टयेत्तथा ? ॥
ततश्चाष्टदलं कृत्वा बीजान्यपि लिखेत्तथा ।
सकारसविसर्गान्तकोणेषु चतुर्षु न्यसेत् ॥
प्रणवं मुख्यदिग्देश्य ? चतुर्दिक्षु क्रमेण तु ।
ततस्स ? द्वेष्टयेत्सर्वं चतुष्कोणं द्विरेखया ॥
खररक्तेन संलेख्यं भूर्जपत्रे मनोहरे ।
एतद्यन्त्रं सुसम्पूज्य प्रक्षिपेद् दुग्धमध्यतः ॥
दुष्टास्सर्वे विनश्यन्ति राजा मानु ददात्यपि ? ।
एकविंशद्दिनं यावत्तावत्तत्रैव यन्त्रकम् ॥
ओं ह्रीं प्रत्यङ्गिरे सो स्वाहा ॥

R. No. 8091 (a).

चक्रप्रयोगमन्त्रः––आन्ध्रटिप्पणीसहितः

CAKRAPRAYOGAMANTRAḤ with Telugu notes

Foll. 13 (a)–14(b) ; 10 granthas.

Begins on fol. 13(a) of the manuscript described under R. No. 8088.

This Mantra is addressed to the Cakra or the divine Disc of Lord Viṣṇu, considered to be one of His deadly weapons for annihilating the enemies.

Complete.

Beginning :

चक्रप्रयोगमन्त्रम् । अस्य मन्त्रस्य ब्रह्मा ऋषिः । विष्णुर्देवता, श्रीचक्रप्रयोगशत्रुनिवारणे विनियोगः । ओं ह्रां ह्रीं शिरसो निकृन्तनाय दुष्टनि ? दुष्टशत्रुकण्ठलुण्ठनाय सकलशस्त्रराजाय खं खं ठं ठं इं हुं फट् स्वाहा ॥

जपलक्षणम् :—

निमिषं निमिषार्धो वा ज्ञानिनामात्मचिन्तनम् ।
शतकोटिसहस्राणि वाजपेयायुतानि च ॥
एतानि ध्यानयोगस्य कलां नार्हन्ति षोडशीम् ।
अन्तर्लक्ष्यं बहिर्लक्ष्यं निमेषोन्मेषवर्जितः ॥
एतेषां शाम्भवं मुद्रा सर्वतन्त्रेषु गोपितः ? ॥

End :

मुद्रेयं खलु खेचरी भवति या....
....भवतिस्तथा ? ।
आयुष्मन्तप्रसादमद्भुतो.... ?
शून्यं शून्यविवर्जितं स्फुरति यत्तत्त्वं पदे शाम्भवम् ॥

R. No. 8092.

कुण्डलि(नी)ध्यानम्

KUṆḌALI(NĪ)DHYĀNAM

Foll. 15 (a)–16(a) ; 12 granthas.

Begins on fol. 15 (a) of the manuscript described under R. No. 8088.

Similar to the work described under R. No. 2831 (q).

Beginning :

ब्रह्मरन्ध्रसरसीरुहोदरे नित्यलग्नमव(धा)[भा]न्तमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं द्वादशार्णसरसीरुहं भजे ॥

तस्य कन्दलितकर्णिकापुटे (कु)[गु]प्तपत्रमकरादिरेखया ।
कोणलक्षितहलक्षितमण्डितं भावलक्ष्यम(भ)[ब]लालयं भजे ॥

तत्पुटोत्पटुतटित्कथारम्भं स्पर्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपुर्बिन्दुनाथमणिपीठमण्डलम् ॥

निषक्तमणिपादुकानियमिताङ्घ्रिकोलाहलं
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रक[म्] ।
परामृतसरोवरोदितसरोजसंरोचिषं
भजामि नितरां स्तुतं गुरुपदारविन्दद्वयम् ॥

Colophon :

कुण्डलिस्तोत्रं सम्पूर्णम् ।

End :

ऊर्ध्वकुण्डलिध्यानम् ।

वक्त्रं शेषफणाधरं चतुर्भुजं खड्गं कपालं तथा
कलशं कुण्डितनायुधं धरयुते वालं चतुष्पादयोः ।
दन्तीपाद कुरङ्गपाद तुरगौ पादौ वृषः पादयोः
अर्धं नारीरमर्धपौरुषमृगो कुण्डल्यशक्तिं भजे ॥

Fol. 16 (a) and 16 (b) contains the 'Durgīdhyānam' and the 'Bālādhyānam', respectively.

R. No. 8092 (a).

शक्तिगणपतियन्त्रम्-आन्ध्रटीकासहितम्

ŚAKTIGAṆAPATIYANTRAM with Telugu meaning.

Foll. 17(a)–18(a) ; 12 granthas.

Begins on fol. 17 (a) of the manuscript described under R. No. 8088.

This work lays down the manner of drawing the Yantra relating to Śaktigaṇapati who is so called when he is associated with his wife, Vallabhā.

Complete.

Beginning :

बिन्दुत्रिकोणषट्कोणं वृत्तयुग्मं च मेव ? च ।
चतुर्दलेषु संलिख्य पुर अष्टदलं भवेत् ॥
वृत्तं षोडशपत्रं स्यात् भूपुरं च समालिखेत् ।
बिन्दुमध्ये तु गं बीजं ऐं क्लीं च सौं लि(कम्)[खेत्]ततः ॥
त्रिकोणमूलमध्यायां आं ह्रीं क्रों क्षौं समालिखेत् ।
षट्कोणेषु नामाख्य ? अष्टपत्रे चतुर्दले ॥
चतुर्दलेषु संलिख्य षट्कोणं वृत्तमाचरेत् ।
त्रिकोणं बिन्दुवृत्तं च गणनाथस्य यन्त्रकम् ॥

R. No. 8093.

ज्वालिनीयन्त्रम्

JVĀLINĪYANTRAM

Foll. 18 (b) ; 3 granthas.

Begins on fol. 18 (b) of the manuscript described under R. No. 8088.

This Yantra comprising only one verse and addressed to Goddess Jvālinī is said to confer on the contemplator the power to attain his object.

Complete.

कूट(सू)[शू]न्यभपिण्डगर्भमपिण्डनिर्मितकर्णिके ?
षोडशस्वरकेसरोज्ज्वलशेषपिण्डदलाष्टके ।
भासुरे नवतत्त्ववेष्टितपङ्क(जेजिन)जासन* शासनं
ज्वालिनीं ज्वलितप्रभामनुचिन्तये फलदायिनीम् ॥

*This reading is given in the manuscript R. No. 8107.

R. No. 8094.

चिदम्बरनटनम् (चक्रम्-यन्त्रम्)

CIDAMBARANAṬANAM—(CAKRAM—YANTRAM)

Foll. 18 (b)-22(b) ; 35 granthas.

Begins on fol. 18 (b) of the manuscript described under R. No. 8088.

Similar to the work described under R. No. 620 (a).

Incomplete.

Beginning :

चिदम्बरं नटनं चक्रं प्रस्तारं(तु) [क्र] म उच्यते ।
रहस्यानां रहस्यं तु सर्वचक्रोत्तमोत्तमम् ॥
समस्तदेवसंसेव्यं दर्शनात् भुक्तिमुक्तिदम् ।
एका(न्ने)[न्ते] गोमयालिप्ते स्वगृहे पटसंवृते ॥
विजने रम्यसदने समासीन उदङ्मुखः ।
गुरुं स्मृत्वा तु मतिमान् धूपयेत् स्थानमुत्तमम् ॥
पश्चादशाङ्गुलाकारं चतुर(स्रं)[श्रं] तु सादयेत् ।
पञ्चप्रस्थान्वितं भस्मा देव्य ? गन्धान्वितं शुचिः ॥
प्रस्तार्य चतुर(स्रं)[श्रं] तु श्लक्ष्णं कुर्यात्तथा रुजः ।
स्वर्णसूच्यादि सर्वत्र द्व्यङ्गुलं बहिरुत्सृजेत् ॥
चतुर्विंशतिकोणार्घं लिखेन्नूपुरषट्ककम् ।
रेखान्तरावकाशां ? तु द्विशूलं परिकीर्तितम् ॥

End :

एवं क्रमेण संलिख्य तन्मध्ये तुमकारयेत् ? ।
तन्मध्ये नकुलश्चैव तन्मध्ये तु त्रिकोणकम ॥
तद्बाह्ये भैरवं चैव रणरङ्गं च भैरवम् ।
....श्चाग्नि भैरवं चाग्निकोणा दिक्षु लिखेत्क्रमात् ? ॥
एतच्चक्रं महागुह्यं रहस्यानां रहस्यकम् ।
शिवस्वहेन ! सहितं गोपनीयं यथा तथा ॥

Colophon:

चिदम्बरयन्त्रं सम्पूर्णम् ।

R. No. 8095.

सुब्रह्मण्यध्यानम् ।

SUBRAHMAṆYADHYĀNAM

Foll. 65 (a)–72 (b); 80 granthas.

Begins on fol. 65 (a) of the manuscript described under R. No. 8088.

Stanzas in contemplation of Lord Subrahmaṇya in His various forms, as specified below.

Fol.

65 (a) सुब्रह्मण्यस्वामिध्यानम् ।
,, शक्तिधरस्वामिध्यानम् ।
,, स्कन्दस्वामिध्यानम् ।
65 (b) देवसेनापतिध्यानम् ।
,, सुब्रह्मण्यस्वामिध्यानम् ।
66 (a) ,, Do
,, गजारूढस्वामिध्यानम् ।
,, शरकाननस्वामिध्यानम् ।
66 (b) कार्तिकेयस्वामिध्यानम् ।
,, कुमारस्वामिध्यानम् ।
,, षण्मुखस्वामिध्यानम् ॥
67 (a) तारकारिस्वामिध्यानम् ।
,, सेनानीस्वामिध्यानम् ।
67 (b) ब्रह्मशास्तृस्वामिध्यानम् ।
,, वल्लीकल्याणस्वामिध्यानम् ।
,, बालस्वामिध्यानम् ।
68 (a) क्रौञ्चभेदनस्वामिध्यानम् ।
,, शिखिवाहनस्वामिध्यानम् ।
,, शरचापपाणिध्यानम् ।
68 (b) शरवणभवध्यानम् ।
,, अरुणकिरणवर्णस्वामिध्यानम् ।
,, कुमारस्वामिध्यानम् ।
72 (a) देवसेनाध्यानम् ।
72 (b) वल्लीध्यानम् ।
,, ,, शरचापपाणिध्यानम् ॥

Incomplete.

Beginning :

ज्ञानशक्तिधरः स्कन्दो देवसेनापतिस्तथा ।
सुब्रह्मण्य(गजारूढो)शरकाननसम्भवः ॥
कार्तिकेयः कुमारश्च षण्मुखस्तारकान्तकः ।
सेनानीर्ब्रह्मशास्ता च वल्लीकल्याणसुन्दरः ॥
बालश्च क्रौञ्चभेत्ता च शिखिवाहन एव च ।
एतानि स्वामिनामानि षोडश प्रत्य (अं दरः)[हं-नरः] ॥

शक्तिधरस्वामिध्यानम्——

एकास्यं द्विभुजं वामे वज्रं दक्षिणतः करे ।
इच्छाज्ञानक्रियाशक्तिरूपशक्तिधरं भजेत् ॥

स्कन्दस्वामिध्यानम्——

कल्पद्रुमं प्रणमतां कमलारुणाभं स्कन्दं भुजद्वयत्रिभङ्गिकमेकवक्त्रम् ।
कात्यायनीसुतमहं कटिबद्धवामं कौपीनदण्डधरदक्षिणहस्तमीडे ॥

End :

शरचापपाणिध्यानम्——

चापशक्तिबाणवज्रसव्यवामधृत्करौ युग्मचक्षुरेकवक्त्रमरुणकोटिसन्निभम् ।
वामकुक्षिकेकिपृष्ठसव्यपादुकस्थितं भजत तारकारिमल भवविनाशकारणम् ॥

वक्त्रसहस्तदशकोलविद्रुमाभां
शक्तिशरखड्गगतमभयध्वजचाप
मकरचापकुलिशाब्जवर
....

R. No. 8096.

चिदम्बरनटनम् (ताण्डवचक्रम्)

CIDAMBARANAṬANAM-(TĀṆḌAVACAKRAM)

Foll. 22 (b)—25 (a) ; 20 granthas.

Begins on fol. 22 (a) of the manuscript described under R. No. 8088.

Similar to the work described under D. No. 6291.

Complete.

Beginning :

चिदम्बरताण्डवचक्रक्रमः—

अस्य श्रीचिदम्बरप्रासादसंमेळनमन्त्रस्य, नटेश्वर ऋषिः, पङ्क्तिश्छन्दः, शिवकामीसमेतचिदम्बरेश्वरो देवता, नं बीजं, मं शक्तिः, शिवाय कीलकम्, शिवकामेश्वरीचिदम्बरेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः। ओं हृदयाय नमः।

ध्यानम्—

हृदयं कमलसोदरं सद(सी)[सि]द्धाश्चैऽत्र तम्।
सदञ्चितमुदञ्चितं कमले कुञ्चितचञ्चलम्॥
विचिन्तये हृदयसंपादं शाश्वतं निजं च करं कान्तम्।
कुञ्चरणमिन्दुचूडामणी ?
सुवर्णरत्नद्वयवक्त्ररूपं विनिग्रहोऽधःपुनरूर्ध्वभागे।
अनुग्रहः श्यामलकृष्णवर्णं श्रीमन्त्ररूपं परमार्थदादिम्॥

मूलमन्त्रः—

ओं ह्रीं श्रीं नमश्शिवाय ओं शिव शिवाय शिवाय नमः वय नम शि शिवाय नमः मशिवयन नम शिवाय यनप शिवा।

(आग्रषना)[आकर्षणा]यादिमन्त्रं स्यात् शिवाय नम(वश्यते)[उच्यते]।
नमश्शिवायमन्त्रं स्यात् रा रा उच्चाटने द्विषाम्॥
संहारमारणश्चैव वयनमश्शिवा वह्निमण्डले।
मशिवायनमन्त्रं स्यात् मोहनं हार्दिमण्डले॥
स्तम्भने यनमश्शिवाभि भिक्ष्यामण्डले पुनः ?।
कोटिसूर्यप्रतीकाशं कुबेरं निलयं महा ?॥
नेत्रत्रयं चतुर्बाहुं पाशाङ्कुशवराभयम्।
शशिखण्डजटाजूटं स्वर्णाभरणभूषितम्॥
सर्वाभरणसंपूर्णं शोभितं स्वर्णभैरवम्॥

चिदम्बरेश्वरमन्त्रः (उच्चाटनमन्त्रः)

घोर घोर चिदम्बरताण्डवाय, शिवशिवाय छ जय नमश्शिवाय, सर्वग्रह उच्चाटनाय, सर्वग्रह आकर्षणाय क्रां ह्रीं श्रीं सर्वग्रहं [हुं] फट् स्वाहा ॥

R. No. 8097.

शिवगायत्री—सुब्रह्मण्यगायत्रीसहिता

ŚIVAGĀYATRĪ with SUBRAHMAṆYAGĀYATRI

Fol. 25 (b) ; 3—granthas.

Begins on fol. 25 (b) of the manuscript described under R. No. 8080.

Gods Śiva and Subrahmaṇya are the presiding Dieties of these Gāyatrīmantras by which they are contemplated upon for protection.

Complete.

Beginning :

शिवगायत्री—

ओं व्योमव्योमाय विद्महे सूक्ष्मसूक्ष्माय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥
तन्महेशाय विद्महे वाग्विशुद्धाय ? धीमहि ।
तन्नो शिवः [तन्नश्शिवः] प्रचोदयात् ॥
क्रों कुक्कुटध्वजाय विद्महे वज्रहस्ताय धीमहि ।
तन्नो स्कन्दः [तन्नस्स्कन्दः] प्रचोदयात् ।

R. No. 8097 (a)

प्रत्यङ्गिरामन्त्रः

PRATYAṄGIRĀMANTRAḤ

Foll. 25(b)–26(a) ; 5 granthas.

Begins on fol. 25 (b) of the manuscript described under R. No. 8088.

This Mantra is addressed to Goddess Pratyaṅgirā.

Complete.

Beginning :

प्रत्यङ्गिरामूलमन्त्रम् ।

Presented in 1948-49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Liberary) No. 2, Parthasarathi Koil St., Triplicane, Madras-5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa

Foll. 1-249(a).

Contains the Śāntiparvan, Rājadharma only. Adhyāyas 1-171 complete.

Same work as that described under D. No. 1947.

Foll. 1, and 249(a) are blank; fol. 249(b) contains the colophon as given below.

शान्तिपर्वराजधर्मस्समाप्तः ॥

Incomplete.

Beginning :

श्रीवैशम्पायनः—

कृत्वोदकं ते सुहृदां सर्वेषां पाण्डुनन्दनाः ।

विदुरो धृतराष्ट्रश्च सर्वाश्च भरतस्त्रियः ॥

End :

एतच्छ्रुत्वा ततो वाक्यं भीष्मेणोक्तं महात्मना ।

युधिष्ठिरः प्रीतमना बभूव जनमेजयः ॥

Colophon :

इति श्रीमहाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां शान्तिपर्वणि कृतघ्नोपाख्यानो नाम पञ्चसप्ततिशततमोऽध्यायः ॥ राजधर्मस्समाप्तः ॥

R. No. 8141.

Palm leaf; 40.6 x 3.7 c.m ; 38.1 x 3.8 c.m.; Foll. 244; Lines: 9–10 on a page; Grantha ; Injured ; 6534 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa

Foll. 2—243.

Contains the Mokṣadharma, in Śāntiparvan; Adhyāyas 1—176.

Same work as that described under D. No. 1947.

Fol. 1(a) gives the title of this work; foll. 1(b) and 244 are blank.

Incomplete.

End :

लेलिहन्ते स्त्रियः प्राख्यं भक्त्या देवं विश्वोत्पन्नम् ।
यस्मात्सर्वे लोकास्सन्तो नानारूपा देवादयो (?) ।
धर्मभुनयश्शान्ता देवास्सर्वे नानासर्गाः ॥

Colophon :

इति शान्तिपर्वणि मोक्षधर्मे नारायणीयोपाख्यानं नाम षट्सप्ततिशततमोऽध्यायः ।

युधिष्ठिरः—

अतीन्द्रिया अनाहारा अनिष्यन्दास्सुगन्धिनः ।
कथं ते पुरुषा जाताः का तेषां गतिरुच्यते ॥
ये विमुक्ता भवन्तीह नरा भारतसत्तम ॥

R. No. 8142.

Palm leaf; 43.7 x 3.7 c.m; Foll. 210; Lines: 8–10 on a page; Grantha; Slightly injured; 6,688 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professer of Sanskrit Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa

Foll. 1–209.

Contains the Moksadharma in Śāntiparvan. Adhyāyas 1–177 complete, and 178 incomplete.

Same work as that described under D. No. 1947.

Fol. 210 is blank.

Colophon :

इति मोक्षधर्मे नारायणीये सप्तसप्ततिशततमोऽध्यायः ॥

Incomplete.

End :

एतस्मिन्नन्तरे वायुस्सर्वगन्धवहश्शुचिः ।
द्रव्यान्यावाह पुष्पाणि कर्मण्याश्चोषकस्तथा ॥
.... शैर्हरिरेकान्तिभिर्नरैः ।
नूनं तत्रागतो देवो यथा तैर्वागुदीरिता ॥
वयन्त्वेतन्न पश्यामो मोहितास्सूर्यमायया ॥
मारुत .... प्रतिपादिते ॥

R. No. 8143.

Palm leaf; 43.2 x 3.9 and 43.9 x 4.5 c.m.; Foll. 199; Lines: 8–11 on a page; Grantha; Slightly injured; 7,200 granthas.

Presented in 1948–49 by Smt. V. Chellammal. wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa.

Foll. 2-193.

Contains the Rājadharma in Śāntiparvan, Adhyāyas 1-171 complete.

Same work as that described under R. 8140.

Foll. 1-4 and 194-199 are blank.

Incomplete.

End :

एतच्छ्रुत्वा ततो वाक्यं भीष्मेणोक्तं महात्मना।

स भ्रातृभिः प्रीतमना बभूव जनमेजय ॥

Colophon :

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां श्रीशान्तिपर्वणि राजधर्मे मित्रध्रुकूकृतघ्नोपाख्यानं नाम एकसप्ततिशततमोऽध्यायः ॥ राजधर्मः सम्पूर्णः ॥

R. No. 8144.

Palm leaf; 34.3x13.9 c.m; Foll. 191; Lines: 10 on a page; Grantha; Injured; 6,208 granthas.

Presented in 1948-49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras-5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa

Foll. 2-190

Contains the Ānuśāsanikaparvan-UttaraBhāga—Adhyāyas 131-252 complete.

Same work as that described under D. No. 1949.

Fol. 1(a) gives the title of the work; foll. 1(b) and 191 are blank.

Incomplete.

Beginning :

देवाः –

असुरस्तारको नाम त्वया दत्तवरः प्रभो ।
सुरान्नृषींश्च क्लिश्नाति वधस्तस्य विधीयताम् ॥

Colophon :

इत्यानुशासनिके सुवर्णोत्पत्तौ एकात्रिंशच्छततमोऽध्यायः ॥

End :

वैशम्पायनः ।

इत्युक्ता सा तु कृष्णेन व्यासेन सरितां वरा ।
त्यक्त्वा शोकं महाराज स्ववार्यवततार ह ॥
सत्कृत्य ते तु सरितं ततः कृष्णमुखा नृपाः ।
अनुज्ञाप्य च ते सर्वे न्यवर्तन्त जनाधिपाः ॥

Colophon :

इति श्रीमहाभारत....आनुशासनिके भीष्मस्वर्गारोहणं नाम द्विपञ्चाशद्द्विशततमोऽध्यायः, आनुशासनिकपर्वस्समाप्तः ॥

R. No. 8145.

Palm leaf; 42.2 x 3.1 and 41.9 x 3-8 c.m.; Foll. 275; Lines: 8–11 on a page; Grantha; Slightly injured. 11,214 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras—5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa.

Foll. 7–273;

Contains the Ānuśāsanikaparvan. Adhyāyas 1–252 complete.

Same work as that described under D. No. 1949 and R. No. 8144, with the additional stanzas in the beginning as given below.

Foll. 1–6, 274 and 275 are blank.

Beginning :

शुक्लाम्बरधरं विष्णुं....सर्वविघ्नोपशान्तये ॥
यस्य द्विरदवक्त्राद्याः....विष्वक्सेनं तमाश्रये ॥
वन्दे लक्ष्मीपतिं देवं....शब्दार्थज्ञानसिद्धये ॥

श्रीवैशम्पायनः—

शिबिराद्धस्तिनपुरं प्राप्य भारत सञ्जयः ।
प्रविवेश महाप्राज्ञो धृतराष्ट्रनिवेशनम् ॥
शोकेनोपहतस्सूतो विह्वलो भृशदुःखितः ।
चिन्तयन् वैशसं घोरं सूतपुत्रस्य पाण्डवैः ॥

युधिष्ठिरः—

धर्मो बहुविधाकारः सूक्ष्मश्चोक्तः पितामह ।
न चैव हृदये शान्तिरस्ति काचिन्ममानघ ॥

R. No. 8146.

Palm leaf, 41.3 x 3.7 and 41.6 x 3.8 c.m.; Foll. 208; Lines: 8-10 on a page; Grantha; slightly injured; 6,180 granthas.

Presented in 1948-49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras—5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa.

Foll. 2—207.

Contains the Ānuśāsanikaparvan 1st part; Adhyāyas 1-130 complete.

Same work as that described under D. No. 1949.

Fol. 1(a) contains the title of this work. Foll. 1(b) and 208 are blank.

End :

ते दीनमनसस्सर्वे देवाश्च ऋषयश्च ह ।
प्रजग्मुश्शरणं देवं ब्रह्माणं जगतः प्रभुम् ॥

Colophon :

इत्यानुशासनिके त्रिंशच्छततमोऽध्यायः ॥

पूर्वसम्पुटं समाप्तम् ।

R. No. 8147.

Palm leaf; 39.4 x 3.3 and 39.5 x 3.1 c.m.; Foll. 186; Lines: 8–11 on a page; Grantha; Slightly injured; 5,611 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit. Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Madras–5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa

Foll. 4–184;

Contains the Ānuśāsanikaparvan Uttarabhāga; Adhyāyas 137–252 complete. The 137th Adhyāya wants the beginning.

Same work as that described under D. No. 1949.

Fol. 1(a) contains the title of this work; foll. 1(b), 2, 3, 185 and 186 are blank.

Incomplete.

Beginning:

........पङ्क्त्याः पङ्क्तिपावन उच्यते ।
कोशादर्धतृतीयात्तु पावयेदेक एव च ॥
ब्रह्मदेवानुसन्तान इति ब्रह्मविदो विदुः ।
अनृत्विगनुपाध्यायः स चेदग्र्यासनं व्रजेत् ॥

Colophon :

इत्यानुशासनिके पात्रविधिर्नाम सप्तत्रिंशच्छततमोऽध्यायः ।

इति श्रीमहाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां आनुशासनिके भीष्मस्वर्गारोहणं नाम द्विपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥

आनुशासनिकपर्व समाप्तम् ॥

R. No. 8148.

Palm leaf ; 34.8 x 3.8, 1.1 c.m. ; Foll. 150 ; Lines: 8—12 on a page ; Grantha ; Slightly injured ; 4,920 granthas.

Presented in 1948–49 Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras—5.

महाभारतम् by व्यास

MAHĀBHĀRATAM by Vyāsa

Foll. 4.–143.

Contains the following Parvans :

Gadāparvan	Adhyāyas	1–11	complete.	Foll.	4(a)—28(b)
Aiṣīkaparvan	,,	1–10	,,	,,	29(a)—38(b)
Sauptikaparvan	,,	1–9	,,	,,	39(a)—55(a)
Mausalaparvan	,,	1–9	,,	,,	56(a)—65 (a)
Āśramavāsaparvan	,,	1–45	,,	,,	66(a)—100(a)
Mahāprasthānikaparvan	,,	1–3	,,	,,	101(a)–105(b)
Svargārohaṇaparvan	,,	1–5	,,	,,	106(a)–112(b)
Strīparvan	,,	1–27	,,	,,	113(a)–143(b)

Same work as that described under D. Nos. 1945, 1922 and D. No. 1953.

Fol. 1(a) gives the title of this work. Foll. 1(b)—3, 55(b), 65(b). 100(b). 144, 147 to 150 are blank. Fol. 145 contains Taniyans or Dhyānaślokas of the Ahoba(i)lamaṭhādhipatis. Fol. 146 contains the Mahābhārata ślokas.

Incomplete.

Beginning :

शुक्लाम्बरधरं विष्णुं.... सर्वविघ्नोपशान्तये ॥

वन्दे लक्ष्मीपतिं देवं ... सिद्धये ॥

सञ्जयः—

रामसान्निध्यमागम्य पुत्रो दुर्योधनस्तव ।

योद्धुकामो महाबाहुः समामृष्यत वीर्यवान् ॥

Colophon :

इति श्रीमहाभारते शतसहस्रिकायां गदापर्वणि एकादशोऽध्यायः ॥

इति श्रीमहाभारते ऐषीकपर्वणि रुद्रमाहात्म्यं नाम दशमोऽध्यायः ॥

ऐषीकपर्व समाप्तम् ॥

इति श्रीमहाभारते सौप्तिकपर्वणि नवमोऽध्यायः ॥ सौप्तिकं समाप्तम् ॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां श्रीमौसलपर्वणि नवमोऽध्यायः । मौसलपर्वं समाप्तम् ॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्रमवासपर्वणि पञ्चचत्वारिंशोऽध्यायः । आश्रमवासपर्वं समाप्तम् ॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां महाप्रस्थानिके पर्वणि तृतीयोऽध्यायः ।

महाप्रस्थानिके दद्यात् पानीयं क्षीरमेव च ।

ततस्सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतम् ॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां पारमहंस्यायामिति स्वर्गारोहणिके पर्वणि पञ्चमोऽध्यायः । स्वर्गारोहणं सम्पूर्णम् ॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायामिति स्त्रीपर्वणि उदकप्रदानं नाम सप्तविंशोऽध्यायः ॥ स्त्रीपर्वं समाप्तम् ॥

R. No. 8149

Śrītāla ; 32.3 x 6.9 c.m; Foll. 400 ; Lines : 16–24 on a page ; Grantha ; Injured ; 24,366 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

रामायणम् by वाल्मीकि

RĀMĀYAṆAM by Vālmīki

Foll. 3 (a) –395(b).

Same work as that described under D. No. 1806 .

Foll. 1–2 and 396 (a) 400(b) are blank.

Complete.

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
सरस्वति नमस्तुभ्यं...सिद्धिर्भवतु मे सदा ॥
वन्दे सरस्वतीं देवीं भुवनत्रयमातरम् ।
यत्प्रसादादृते नृणां जिह्वा न परिवर्तते ॥
कूजन्तं राम रामेति ... वाल्मीकिकोकिलम् ॥
वाल्मीकेर्मुनिसिंहस्य ... को न याति परां गतिम् ॥
यः पिबन् सततं ... प्राचेतसमकल्मषम् ॥
गोष्पदीकृतवाराशिं ... वन्देऽनिलात्मजम् ॥
अञ्जनानन्दनं वीरं ... लङ्काभयङ्करम् ॥
आमिषीकृतमार्तण्डं ... आञ्जनेयं नमाम्यहम् ॥
उल्लङ्घ्य सिन्धोः ... प्राञ्जलिराञ्जनेयम् ॥
मनोयुजं मारुततुल्ययोगं ... शिरसा नमामि ॥
श्रीराघवं दशरथात्मजं ... निशाचरविनाशकरं नमामि ॥
वेदवेद्ये परे पुंसि ... साक्षात् रामायणात्मना ॥
शृण्वन् रामायणं भक्त्या ... ब्रह्मणा पूज्यते सदा ॥
वाल्मीकिगिरिसम्भूता ... रामायणमहानदी ॥
राममिन्दीवरश्यामं .... राजीवायतलोचनम् ॥
रक्षःकुलसरोजाब्दं .... राजदन्त्यङ्कुशं स्तुमः ॥
चरितं रघुनाथस्य ... महापातकनाशनम् ॥
तदुपगतसमाससन्धियोगं .... दशशिरसश्च वधं निशामयध्वम् ॥
आदिकाव्यमिदं येन प्रोक्तं रामायणं पुरा ।
प्राचेतसाय मुनये तस्मै वाल्मीकये नमः ॥
तपस्स्वाध्यायनिरतं ... वाल्मीकिर्मुनिपुङ्गवम् ॥

R. No. 8150

Śrītāla; 39.2 x 5.9, c.m.; Foll. 308; Lines: 16-20, on a page; Grantha; Slightly injured; 24,900 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

रामायणम् by वाल्मीकि

RĀMĀYAṆAM by Vālmīki

Foll. 1—307.

Begins from the end of the 26th Sarga of Bālakāṇḍa and runs upto Uttarakāṇḍa—7 Kāṇḍās complete.

Same work as that described under D. No. 1806.

Foll. 162(a) and 308 are blank.

Incomplete.

Beginning:

.... ज वनं चैत्ररथं यथा ।

निहत्य तां यक्षसुतां स रामः .. ...

Colophon:

श्रीमद्बालकाण्डे षड्विंशतिस्सर्गः ॥

R. No. 8151.

Palm leaf; 44.2 x 3.5 c.m; Foll. 156; Lines: 13–26 on a page; Grantha; Injured; 12936 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras, and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

न्यायरक्षामणिः by अप्पय्यदीक्षित

NYĀYARAKṢĀMAṆIḤ BY Appayyadīkṣita.

Foll. 2(a)—155(a);

Contains the Ist Adhyāya, complete.

Same work as that described under D. No: 14681.

Foll. 1,155 (b), and 156 are blank.

Incomplete.

End :

तस्मात् ब्रह्म जगतो निमित्तमुपादानञ्चेति युक्तं ब्रह्मणो लक्षणम् ।

Colophon :

इति श्रीभारद्वाजकुलजलधिकौस्तुभश्रीम ... . विश्वजिद्याजिश्रीरङ्ग-राजाध्वरिवरसूनोरप्पय्यदीक्षतस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमस्याध्यायस्य चतुर्थः पादः ॥ अध्यायश्च ॥

R. No. 8152

Palm leaf; 39.6 x 5.3 c.m; Foll. 67; Lines: 9-10 on a page; Grantha; Much injured; 5000 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras—5.

विधिरसायनसुखोपजीविनी by अप्पय्यदीक्षित

VIDHIRASĀYANASUKHOPAJĪVINĪ by Appayyadīkṣita

Foll. 2 (a)—66 (b)

Contains 1 to 39 Ślokas complete; 40th Śloka incomplete.

Same work as that deseribed under D. No. 4475 and R. 287.

Incomplete.

End :

....तयोरधिकरणत्वेन प्रणीताकार्ये विधानादुपादेयत्वेन च प्रकृतग्रहणे प्रमाणाभावात् लौकिक एव दध्नि पयसि चरुश्रपणं कृत्वा सायन्दो....

Fol. 1 (a) gives the title of this work. Foll. 1 (b) and 67 are blank.

(R. Nos. 8153 to 8157 in one bundle)

Palm leaf; 36.6 x 3.7 and 34.2x4.4 c.m; Foll. 57; Lines: 6–10 on a page; Grantha; Much injured.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

R. No. 8153.

मीनाक्षीस्तवः

MĪNĀKṢĪSTAVAḤ

Foll. 1 (a)8—(a) ; 150 granthas. Fol. 8 (b) is blank.

Begins on fol. 1(a).

The other works here in are :—

Sundareśalīlāsaṅgrahaḥ : fol. 9 (a); Pārthivaliṅgapūjāvidhiḥ fol. 21 (a); Rāmabhadrastavaḥ : fol. 34 (a); Prakīrṇaślokāḥ : fol. 46 (a).

Contains Stanzas 11 to 84 and 96 to 100.

Similar to the work described under R. No. 3986 (g).

Incomplete.

Beginning :

....वनिता सङ्कवलिता
तृतीयं .... ।
प्रभो यद्दिग्वस्त्रां द्विरदवरचर्माम्बरमहो
चिता भस्म .... महिमा मङ्गलतया ॥ ११ ॥
भवत्यास्सौभाग्याद्गरलमपि भुक्त्वा तव पतिः
पुनर्जीवत्यस्मात्स्वरमद्‌ .... ति चिरम् ।
तदप्येवं तिष्ठत्वखिलफणिभूषावृततनुः
किमूचे माङ्गल्यप्रभवमहिमासन्ततिमहो ॥ १२ ॥

End :

.... स्तोत्रं तव करुणया मीननयने
भवत्या माहात्म्यात् भुव .... ।
.... मधिकं
तदेतत्सम्पूर्णं कुरु जननि माता सुतमिव ॥ १०० ॥
....
.... विरचयति यज्वा बुधमुदे ।
समाकर्ण्यैतत्ते मयि परम ....
.... ॥ १०१ ॥
आनन्दवल्लीसमेत श्रीकै ....

R. No. 8154.

सुन्दरेशलीलासङ्ग्रहः by वेङ्कटरामयज्वन्

SUNDAREŚALĪLĀSAṄGRAHAḤ by Veṅkaṭarāmayajvan

Foll. 9 (a)—18(b); 170 granthas.

Begins on fol. 9 (a) of the manuscript described under the previous number.

Similar to the work described under D. No. 2610.

Complete.

Beginning :

—— —— —— —— —— —— सुन्दरेश

दृष्ट्वैवातीव हृष्टा विकृतिकुचतिरोधानतो न्यस्तशङ्का

तत्सामर्थ्यं विदित्वा त्वमपि सि....धुरां प्राप्तवान्नः प्रसीद ॥

*   *   *

ब्रह्माण्डानां प्रभुस्त्वं हि निखिलजननी पार्वती मीननेत्रा

सम्भूता पाण्ड्यभूपात् शिव यदपि तदा तत्सुजामातृरूपी ।

चित्रं राज्याधिनाथस्स्वयमवनितले सुन्दरेशाख्यपाण्ड्यो

लीलाजालं करोषि स्फुटमिह शिवया मोहितो नः प्रसीद ॥

पञ्चमी लीला ॥

End :

श्रीगङ्गादृष्टपुर्यां स्थिरमपि वसता यज्वना भूसुरेण

श्रीवेङ्कट्रामनाम्ना विदितमतिमता श्रेयसे सङ्ग्रहेण ।

श्रीमीनाक्षीपते त्वं शिव तव कृपया त्वच्चतुष्षष्टिलीलाः

प्रोक्ता व्यत्यासमाद्युः प्रभवत यदि यत् तत्क्ष(मं नः) [मन्नः] प्रसीद ॥

स्वामिन् श्रीसुन्दरेश त्वयि विहितधिया मीननेत्राकटाक्षात्

गौर्या सञ्चोदितेनाप्रविदितुमचिरात् त्वत्पदाब्जप्रभावम् ।

त्वल्लीलासङ्ग्रहं यद्रचितमिह मया तद्यथाबुद्धि मोहात्

व्यत्यासं यत् क्षम[स्वं] (त्वं) सुतकृतमखिलं तत्पितेव प्रसीद ॥

त्वल्लीलासङ्ग्रहं यज्जगति च मनुजः श्रद्धया यः पठन् वा

शृण्वन् वा मोदयन् वा क्व मनसि वसति चेत्तल्लिखित्वार्चयन्वा ? ।

मीनाक्षीनाथ तं त्वं शिव तव करुणापाङ्गपीयूषधारा-
पात्रं कृत्वा च तस्मै भुवि दिवि सुखदस्सन्ततं नः प्रसीद ॥
स्वामिन्नाकाशमूर्तिः स्फुटमपि शिवया संयुतस्त्वं त्रिमूर्तिः
सृष्टिस्थित्यन्तकृत्यैर्विधिहरिहररूपी त्वं विचित्रं ह्ययनात् ? ।
लीलाजालं प्रकुर्वन्विहरसि किमहो नालमित्येव मत्वा
नीपाटव्याश्च भूयः कृतमपि भवता मानवेभ्यः प्रसीद ॥

Fol. 19 (a) contains some Tamil verses ; fol. 19 (b) contains Nārāyaṇaprārthanā ; fol. 20 (a) contains the Bhavānīstotra ; fol. 20 (b) is blank.

R. No. 8155.

पार्थिवलिङ्गपूजाविधिः

PĀRTHIVALIṄGAPŪJĀVIDHIḤ

Foll. 21 (a)—29 (b) ; 150 granthas.

Begins on fol. 21(a) ; of the manuscript described under R. No. 8153.

Deals with the daily worship of Liṅga made of Earth.

Incomplete.

Beginning :

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टारवं तत्र देवताह्वानलाञ्छनम् ॥
अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया ॥

ओंभूर्भुवः

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वञ्च धारयसि मां देवि पवित्रञ्चासनं कुरु ॥

ह्रीं आधारशक्तिकमलाय नमः । क्षं क्षेत्रपालकाय नमः । सं सरस्वत्यै नमः । पं परमात्मने नमः । हरः अस्त्राय फट् भूर्भुवस्स्वरोमिति दिग्बन्धः । अग्निप्राकराय नमः ।

शुक्लाम्बरधरं....शान्तये ॥

मम उपात्त.......र्थं पार्थिवलिङ्गपूजां करिष्ये । तदादौ कलशपूजां च करिष्ये । नमो ब्रह्मादिभ्यः ब्रह्मविद्यासम्प्रदायकर्तृभ्यः । नमो वंशऋषिभ्यः । नमो गुरुभ्यः । अस्य पञ्चाक्षरीमहामन्त्रस्य वामदेव ऋषिः पङ्क्तिश्छन्दः । साम्बसदाशिवो देवता ओं बीजं ह्रीं नमश्शक्तिः शिवाय कीलकम् , मम........ प्रसादसिद्ध्यर्थे जपे विनियोगः ॥ ध्यानम् :—

शान्तं पद्मासनस्थं शशिधरमकुटं पञ्चवक्त्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तम् ।
नागं पाशञ्च घण्टां प्रलयहुतवहं साङ्कुशं वामभागे
नानालङ्कारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥

नमश्शिवाय ।

* * * *

सर्वाधारधरे देवि त्वद्रूपां मृत्तिकामिमाम् ।
ग्रहीष्यामि प्रसन्नात्मन् लिङ्गार्थं भव सुप्रभे ॥

* * *

ओं हंसस्सोऽहं सोऽहं हंसः ॥

स्वात्मसंस्थमयं प्रोक्तं त्वामद्य परमेश्वर ।
अर........व हव्याशं मूर्ताविवाहयाम्यहम् ॥

मङ्गलायतनं देवं युवानमतिसुन्दरम् ।
ध्यायेत्कल्पतरोर्मूले सुखासीनं सहोमया ॥

आ त्वा वहन्तु हरयस्सचेतसः श्वेतैरश्वैस्सह केतुमद्भिः ।
वाताजितैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम् ॥
(त्रिय)[त्र्य]म्बकं....मृतात ॥ अस्मिन् लिङ्गे साम्बशिवं ध्यायामि ।

* * *

स्नपयामि । स्नानानन्तरं आचमनीयं समर्पयामि ।
स्वामिन् सेतौ पुरा त्वं तव हि परिजनान् भूपनिर्बन्धभीतान्

दृष्ट्वा संरक्षितुं तान् प्रथितकरुणया लोकसंमोहनाय ।
पारं श्री ....यस्सलिखितमहो दर्शयित्वा फणीन्द्रात् ?
तल्लेखा....लो....तस्तरन्नयनमपहृतं दत्तवान् यत्पुनश्च ? ॥

End :

पूजां मत्वा स्वभक्तैः शिव दुरनुनयां यां क्रियां तां कृतां ते
येषां या या मनीषा ह्यविकलमददास्तेभ्य एवा (सि)[नि]तान्तम् ।
स त्वं मह्यं ह्युपेक्षां कथमिह कुरुषे पूजितश्चेन्मया भो ।
त्वत्पूजायाः फलं मे गिरिश भवति चेत् पाहि मां भक्तमुख्यम् ॥

Fol. 30, contains the Rāmabhadrastava; fol. 31 contains the Śivadhyānaślokas; fol. 32 contains the Īśāṣṭottaraślokas, Śivakavacamantra, Ṛṣichandodevatās and Rāmāyaṇaślokas; foll. 32 (b) and 33(b) contain the Kirātaveṣaśivastotra and fol. 33(a) is blank.

R. No. 8156.

रामभद्रस्तवः by वेङ्कटरामयज्वन्

RĀMABHADRASTAVAḤ by Veṅkaṭarāmayajvan

Foll. 34 (a) – 45 (b); 300 granthas.

Begins on fol. 84(a) of the manuscript described under R. No. 8153.

Contains one hundred and fifty-two stanzas in praise of Śrirāma, composed by Veṅkaṭarāmādhvarin.

Incomplete.

Beginning :

आदौ नत्वा गणेशं शरवणजनितं पार्वतीप्राणनाथं
वाणीजानिं रमेशं गुरुमपि पितरं मातरं भूसुरेन्द्रान् ।
बालानां बोधनार्थं रघुकुलवरश्रीरामभद्रानुगीतं
यत्कारुण्याद्यतिष्ये रचयितुममलं राघवं तं भजेऽहम् ॥
लोके विद्वत्प्रगीतं बहुविधमनघं विस्तरं ग्रन्थकोटया
यत्कृत्यं यत्कटाक्षात् पुनरपि च यथाबुद्धि तद्वर्णयामि ।
देवाद्यैः पूजितो यो जगति च स शिवो मानवैः किं न पूज्यः
तस्माद्गृह्णन्तु सन्तो मदुदितमपि तं रामभद्रं भजेऽहम् ॥

End :

क्षीराब्धेर्यस्तु देवैस्त्रिदशपतिमुखैः प्रार्थितो राक्षसेन्द्रं
हन्तुं भूमौ प्रभूतस्सपदि रघुकुले सीतया रामभद्रः ।
निर्वर्त्याजौ प्रतिज्ञां निशिचरमथनात् भुक्तभोगस्समानां
वैकुण्ठेशस्सहस्रं दशदशशतकं प्राभवत्तं भजेऽहम् ॥
यत्कारुण्याच्च यो यद्रघुकुलवरश्रीरामभद्रानुगीतं
श्रीवेङ्कटाध्वरी(?)मयज्वा विरचयति मुदे भूसुराणाञ्च येषाम् ।
तच्छ्रुत्वा ते तु तस्मै प्रमुदितहृदया मञ्जुवाणीर्वदन्त-
स्स्वाशीर्वादं प्रचक्रुः प्रणमितवदनस्तान् सदा तं भजेऽहम् ॥

R. No. 8157.

प्रकीर्णश्लोकाः

PRAKĪRṆAŚLOKĀḤ

Fol. 46 (a)—56 (b) ; 200 granthas.

Begins on 46 (a) of the manuscript described under R. No. 8153

Similar to the work described under No.

Incomplete.

Beginning :

स्वामिन् कल्क्यावतारे त्वमपि हयमुखात् म्लेच्छमुख्यारिवर्गं
जित्वा त्वत्पादपद्मे दृढमपि भजतां रक्षणे मानवानाम् ।
सम्भूतो भूमिभागे कलियुगसमयात् पूर्ववद्वर्णकीर्तिं
यत्कुर्वन्नाश्रमाणां विहरसि किमहो यो हरिर्नः प्रसीद ॥

Fol. 46 contains the Sundareśalīlāsaṅgrahaślokas ; fol. 47 contains the Vākyapañcāṅga by the son of Gopala of Śrīraṅgam.

वागीशाद्यास्सुमनसः......तं नमामि गजाननम् ॥
सूर्याय शीतरुचये धरणीसुताय सौम्याय देवगुरवे भृगुनन्दनाय ।
सूर्यात्मजाय भुजगाय च केतवे च नित्यं नमो भगवते गुरवे पराय ॥
श्रीरङ्गनिलयश्रीमद्गोपालार्यस्य पुत्रकः ।
करोति वाक्यपञ्चाङ्गं गणितागमतत्त्ववित् ॥

श्रीमद्व्यावहारिकसौरान्तर्गतचान्द्रमानेन विन्ध्यस्योत्तरदेशे बार्हस्पत्य-मानेन विक्रमनामाब्दो व्यवहारः । अस्मिन् विन्ध्यस्य ... ...

*   *   *

मूर्ध्निस्थं जेतुमिच्छन्निव कमलरिपुं चन्द्रमादौ तवाहो
पादाब्जं याचयन्मे हृदयसरसिजं बन्धुतस्त्वत्प्रसादात् ।
मौलिं सम्प्राप्य शम्भो बहुविधकुसुमैः पूजितैर्लोकपालैः
गङ्गामाश्रित्य साकं सुकमलजननीं राजते हं(सु)[स]मुक्त(ः)[म्] ॥

End :

क्षन्तव्यो मेऽपराधश्शिव शिव भवता जन्मजन्मार्जितो वा
जन्मन्यस्मिन् कृतो वा मतिविषमवशाज्ज्ञानतोऽज्ञानतो वा ।
नेत्रश्रोत्रार्जितं वा करचरणकृतं कर्मवाक्कायजं वा
मत्तस्सर्वं व्यपोह्य त्वमिह भयजं पाहि मां भक्तमुख्यम् ॥

Fol. 54 contains 6 verses of " Eṭṭappabhūpatisandeśa " in Maṇipravāla style.

आयुः पूर्णं महेशाद्धनमपि धनपाद्देहपुष्टिर्दिनेशा-
ल्लक्ष्मीवासं रमेशाद्धृतिरमरपतेस्सत्कलत्रं जलेशात् ।
सन्तानं पद्मयोनेर्विजय इह गुहाद्धर्मराजात्सुबुद्धि-
स्सत्कीर्तिर्भूसुरेभ्यो रसमपि शशिनस्तेऽस्तु नित्यं महीन्द्र ॥

End :

मूनां (णां) पिळ्ळैविवाहार्थं पञ्चाशन्निष्कसंज्ञिकम् ।
देहि मे त्वं जगद्वीररामयट्टप्पभूपते ॥
इल्लैयेन्नालेङ्ङ् पोवेन् मन्ददृष्टिस्त्वया विना ।
तन्दु रक्षिक्कवे वेणुं रामयट्टप्पभूपते ॥
वेङ्कटेश्वरयट्टप्पदुरैस्वामिमहीपते ।
आयुः पूर्णं पुत्रभाग्यं चन्द्रचूडो ददातु ते ॥

Fol. 55 (a) Contains the Nārāyaṇastotra.

स्वामिन् नारायणाद्य प्रचुरसरसिजे वन्दिते य.... ....
....रक्षकोऽभूद्विचित्रम् ।

सोऽहं नारायण ....

नारायण त्वं कथमिह भगवन् मय्युपेक्षां करोषि ॥

.... नारायण त्वं जगति मम हृशोर्मे ... ...

Fol. 56 (b) is blank.

R. No. 8158

Palm leaf; 36.9 x 3.6 c.m; Foll. 77; Lines: 8–9 on a page; Grantha; Much injured; 2,000 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and the Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

कुवलयानन्दः by **अप्पय्यदीक्षित**

KUVALAYĀNANDAḤ by Appayyadīkṣita

Same work as that described under D. No. 12846.

Wants the beginning.

Complete.

.... त् येन दग्धाः पुरः क्षणात् ।

अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम् ॥

शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् ।

अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥

साध्वीयमपरा लक्ष्मीरसुधासागरोद्भवा ॥

Colophon:

कुवलयानन्दं समाप्तम्

(R. Nos. 8159 to 8169 in one bundle)

Palm leaf; 32.3 x 3.2 c.m.; Foll. 140; Lines: 7–11 on a page; Grantha; Good.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras—5.

R. No. 8159.

रामायणसारसङ्ग्रहस्तवः—सव्याख्यः by अप्पय्यदीक्षित

RĀMĀYAṆASĀRASAṄGRAHASTAVAḤ with Commentary by Appayya Dīkṣita

Foll. 2(a)—18(a); 500 Granthas.

Begins on fol. 2 (a); The Other works herein are:—

Bhāratasārasaṅgrahaḥ: Fol. 19 (a); Śrutisūktimālā with Vikāsinī: fol. 40 (a); Maitreyopaniṣat: fol. 120 (a); Pippalādopaniṣat: fol. 121 (b); Bhṛṅgiriṭaprārthanā: fol. 125 (a); Praśnottararatnamālā: fol. 126 (a); Śivapūjāvidhiḥ: fol. 130 (a); Śivajñānabodhaḥ: fol. 137 (a); Śaivapraśamsāvacanāni: fol. 139 (a); Śivanirmālyādivicāraparaślokāḥ: fol. 140 (a).

Same work as that described under D. No. 11139.

Complete.

Fol. 1 (a) gives the title of this work; fol. 1 (b) and 18 (b) are blank.

R. No. 8160.

भारतसारसङ्ग्रहस्तवः—सव्याख्यः by अप्पय्यदीक्षित

BHĀRATASĀRASAṄGRAHASTAVAḤ with Commentary by Appayya Dīkṣita

Foll. 19 (a)–38(a); 600 granthas.

Begins on fol. 19(a) of the manuscript described under the Previous number.

Same work as that described under D. No. 5095.

Complete.

Foll. 38 (b) and 39 are blank.

R. No. 8161.

श्रुतिसूक्तिमाला by हरदत्ताचार्य with विकासिनी by यज्ञेश्वरभट्टोपाध्याय

ŚRUTISŪKTIMĀLĀ by Haradattācārya with Vikāsinī by Yajñeśvarabhaṭṭopāddhyāya

Foll. 40(a)–119(b); 2500 granthas.

Begins on fol. 40 (a) of the manuscript described under R. No. 8159.

Ślokās 1-100 complete and 101 incomplete.

Same work as that described under R. No. 5096(b).

End :

अनादिमध्यनिधना शक्तिराद्या सनातनी ।
शक्तिराज्ञापरा शैवी चिद्रूपा परमेश्वरी ॥
शिवोऽधितिष्ठत्यखिलं यया कारणभूतया ।
सर्वैश्वर्यपरा काष्ठा शिवस्याव्यभि[चारिणी] ॥

R. No. 8162.

मैत्रेयोपनिषत्

MAITREYOPANIṢAT

Foll. 120 (a)-121 (b); 55 granthas.

Begins on fol. 120 (a) of the manuscript described under R. No. 8159.

Similar to the work described under D. No. 731.

Complete.

Beginning :

आप्यायन्त्विति शान्तिः ।

अथ भगवान् मैत्रेयः कैलासं जगाम । तगुँ होवाच । भो भगवन् महादेव परमतत्त्वरहस्यमनुब्रूहीति । सहोवाच महादेवः परमकारुणिकः —

देहो देवालयः प्रोक्तो जीवो देवस्सदाशिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ॥

End :

दृष्टदर्शनदृश्यानि त्यक्त्वा वासनया सह ।
दर्शनप्रथमाभासमात्मनः केवलं भज ॥
संशान्तसर्वसङ्कल्पा या शिलावदवस्थितिः ।
जाड्यनिद्राविनिर्मुक्ता सा स्वभावस्थितिः परा ॥
सा स्वभावस्थितिः परा इति ओं ॥ आप्यायन्त्विति शान्तिः त्रिः ॥

R. No. 8163.

पिप्पलादोपनिषत् ।

PIPPALĀDOPANIṢAT

Foll. 121 (b)—122 (b); 30 granthas.

Begins on fol. 121(a) of the manuscript described under R. No. 8159.

Same work as that described under D. No. 609 with additinal portion in the beginning as given below.

Complete.

Beginning:

भद्रं कर्णेभिश्शान्तिः ।

अथ पिप्पलादो ब्रह्मांशो ब्रह्माणं पप्रच्छ । भो भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वाऽधिकतरो ध्येयस्स्यात् । तत्त्वमेव नो ब्रूहीति । तस्मै स होवाच पितामहः प्रभुः । हे! पिप्पलाद! शृणुवाक्यमेतत ॥

बहूनि पुण्यानि कृतानि .... मोहं न जानन्ति सुरेन्द्रमुख्याः । यः पादपद्मार्चितविष्णुनेत्रस्तस्मै ददौ चक्रमतीव हृष्टः । त .... स्तु

End:

तस्मात्सर्वान् परित्यज्य हेयान्विष्ण्वादिकान् सुरान् ।
शिव एव सदा ध्येयस्सर्वसंसारनाशकः ॥
तस्मै रुद्राय महाग्रासाय महेश्वराय नमः ॥
एको विष्णुर्म .... व्ययः ॥ तस्मै .... स्तु, भद्रं कर्णेभिश्शान्तिः ॥

Fol. 123 is blank and fol. 124 contains some lines in the Daṇḍaka metre.

R. No. 8164.

भृङ्गिरिटप्रार्थना

BHṚṄGIRIṬAPRĀRTHANĀ

Fol. 125; 20 granthas.

Begins on fol. 125(a) of the manuscript described under R. No. 8159.

Contains 1–7 stanzas taken from the 7th Adhyāya of Śrīśaila-māhātmya in Śivarahasyakhaṇḍa of Brahmāṇḍapurāṇa.

Similar to the work described under D. No. 11001.

Incomplete.

Beginning :

ब्रह्माण्डपुराणे शिवरहस्यखण्डे श्रीशैलमाहात्म्ये भृङ्गिरिटिस्तुतौ :—

तत्रैते तप्तमुद्राङ्कितततनुनिकरा जारेतेःप्रक्लृप्त-

श्वेतच्छिद्रोर्ध्वपुण्ड्राङ्कितनिटिलभुजद्वन्द्वनाभ्यादिदेशाः ।

अन्तः कौपीनवन्तो बहिरपि बहुशो वेष्टयन्तोऽपि वस्त्रै-

रन्यस्त्रीमातृलक्ष्माःशिव शिव तव विद्वेषिणस्संचरन्ति ॥

End :

नाहं स्वामेक एषु त्रिपुरहर तव द्वेषिषु प्राणनाथ !

त्वं सर्वज्ञोऽसि नित्यं तत इह पुरतः किं वदेत्पालनीयः ।

किं सम्प्रार्थ्यं तदस्ति त्रिणयन भवतोऽप्यप्रतोऽथापि जन्तो-

र्भूयो भूयो ममालं जनिरिति च सदेहामृतं देहि नित्यम् ॥

R. No. 8165.

प्रश्नोत्तररत्नमाला by अमोघवर्षराजन्

PRAŚNOTTARARATNAMĀLĀ by Amoghavarṣarājan

Foll. 126 (a)–128(a) ; 35 granthas.

Begins on fol. 126(a) of the manuscript described under R. No. 8159.

Same work as that described under D. No. 5177.

Complete.

Beginning :

कः खलु नालङ्क्रियते दृष्टादृष्टार्थसाधनपटीयान् ।

अमुया कण्ठस्थितया प्रश्नोत्तररत्नमालिकया ॥

End :

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ॥

Foll. 128(b) and 129 are blank.

R. No. 8166.

शिवपूजाविधिः

ŚIVAPŪJĀVIDHIḤ

Foll. 130 (a)–135 (a) ; 100 granthas.

Begins on fol. 130 (a) of the manuscript described under R. No. 8159.

Specifies the manner of conducting the worship of Śiva.

Complete.

Beginning :

शैवदीक्षापराणां पूजापद्धतिः ।

अस्त्रेण सम्प्रोक्ष्य कवचेन सम्मृज्य चतुष्कपीठं निर्माय पूर्वादिदिक्षु अस्त्रेण पत्रं निक्षिप्य, अस्त्रेण पूजापात्राणि पुष्पाणि च प्रोक्ष्य निकटे निधाय उत्तराभिमुखः स्थितः, आचम्य, करशुद्धिकरन्यासाङ्गन्यासं कृत्वा अस्त्रेण कलशं शुद्धी[द्धं] कृत्वा, वस्त्रं धारयित्वा चतुश्शुद्धिं कृत्वा ईशानादिपञ्च हृदयादिषट् आहृत्य एकादशमन्त्रैः जलं स्पृष्ट्वा जपेत् ॥

End :

सामान्यपात्रादस्त्रमनुपत्रेणोद्वासयेत् । ईशानकोष्ठं षडङ्गार्चना, धूपदीपप्रार्थना ह्यारोपयेत् ॥

Foll. 135(b) and 136(a) are blank ; fol. 136(b) contains two stanzas of Kṛṣṇaśivastotra.

R. No. 8167.

शिवज्ञानबोधः

ŚIVAJÑĀNABODHAḤ

Fol. 137 ; 13 granthas.

Begins on fol. 137 (a) of the manuscript described under R. No. 8159.

Contains the Pāśavimocanapaṭala of the Rauravāgama.

Same work as that described under D. No. 5109 with an additional stanza in the beginning as given below.

Complete.

Beginning :

ओं ज्ञानन्यग्रोधमूलस्थसनकादिगुरोः प्रभोः ।
कल्याणशैलधनुषम्सुतं गणपतिं भजे ॥
स्त्रीपुंनपुंसकादित्वात् न्नजस्थसारम्भुईरिः ॥

Fol. 138 contains some Stanzas on Yoga.

R. No. 8168.

शैवप्रशंसावचनानि

ŚAIVAPRAŚAMSĀVACANĀNI

Begins on fol. 139 (a) of the manuscript described under R. No. 8159.

Sings the praise of Śaivism.

Incomplete.

Beginning :

आब्रह्मस्तम्बपर्यन्तं यत्रानन्दं प्रतीयते ।
शिवभक्तिं विना नान्यत् तत्र कारणमिष्यते ॥
श्रीमत्तिल्लवनस्थानां त्रिसहस्रद्विजन्मनाम् ।
श्रीमहाशैवमुख्यानां दासदासोऽस्म्यहं सदा ॥

End :

भ्रूणहत्या न वार्या ते विष्णो कल्पशतैरपि ।
यदि मे न क्षुधाशान्तिरिह स्यान्मधुसूदन ॥
सन्तो न प्रतिकुर्वन्ति सागस्सु त्वादृशेष्वपि ।
न निष्कृतिरघस्यास्य तथापि श्रूयतामिदम् ॥
रुद्राध्यायमहामन्त्रायुतसाहस्रकोटिभिः ।
दुग्धधाराभिषेकेन शिवलिङ्गस्य निष्कृतिः ॥

तथैवासौ महादेवमभिषिच्य महेश्वरम् ।
दिव्ये मरतके लिङ्गे दिव्यवर्षगणान् बहून् ॥
दशकोटयब्दविलये बागभूदशरीरिणी ॥

R. No. 8169.

शिवनिर्माल्यादिविचारपरश्लोकाः

ŚIVANIRMĀLYĀDIVICĀRAPARAŚLOKAḤ

Fol. 140 ; 11 granthas.

Begins on fol. 140 (a) of the manuscript described under R. No. 8159.

The verses have been taken from the Svāyambhuvatantra.

Similar to the work described under D. No. 5509.

Incomplete.

Beginning :

निर्माल्यं निर्मलैर्भोज्यं निर्मलात्मा परिग्रहेत् ।
तस्माच्छिवस्य निर्माल्यं शुद्धद्रव्यमिति स्मृतम् ॥

स्वायम्भुवे :—

भास्करस्य तु नैवेद्यं भुक्तं व्याधिक्षयं भवेत् ।
अभोज्यं भानुभक्तानां नैवेद्यं भास्करस्य तु ॥
अभोज्यं ब्राह्मणानां तु तथा शास्त्रनिवेदनम् ।
सदाशिवस्य निर्माल्यं मानुषाणां न भोजनम् ॥
पशूनाञ्च गजानाञ्च जले वाऽथ विनिक्षिपेत् ।
अथवा वह्निना दह्यात् भूमावाखनयेद्बुधः ॥
आत्मार्थञ्चलिङ्गञ्च न निर्माल्यं तु कथ्यते ।
स्फटिकं बाणलिङ्गञ्च स्थापितञ्चलमेव वा ।
तन्निवेदितनिर्माल्यं न निर्माल्यं प्रकल्पयेत् ॥

End :

एलाधिवासितं साक्षाच्छुद्धतोयमिति स्मृतम् ।
एलागन्धादिसुरभि स्नानीयं तु प्रचक्षते ॥

दधिमध्वाज्यसहितं मधुपर्कं प्रचक्षते ।
एलापाटलकाश्मीरैः पानीयं तु प्रचक्षते ॥

Fol. 141 contains some Tamil verses taken from Tiruvāymozhi (I. iii. 6 and 7) of Nammāzvār of Āzhvārtirunagari situate on the banks of the Tāmraparṇi and from Periyatirumozhi (VI. i. 2 and 3 and IV. v. 6) of Tirumangaiyāzhvār of Triuvāli Tirunagari near Sirkāzhi; fol. 142 (a) is blank and fol. 142 (b) contains some Index.

R. No. 8170.

Palm leaf; 44.4 x 3.7 c.m; Foll. 36; Lines: 10–12 on a page; Grantha; Slightly injured; 1450 granthas.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras—5.

ब्रह्मसूत्रभाष्यम् by शङ्कराचार्य

BRAHMASŪTRABHĀṢYAM by Śaṅkarācārya

Foll. 2(a)–28(b).

Contains portions from the beginning to the end of tha 17th Sutra of the third Pāda of the third Adhyāya and breaks off in the course of the commentary on the 18th Sūtra

Same work as that described under D. No. 4660.

Incomplete.

Foll. 29(a)–35(b) contain a portion in the beginning of the Commentary of the Brahmasūtrabhāṣya of Śaṅkarapañcapādikā.

Fall. 1 and 36 are blank.

(R. Nos. 8171 to 8173 in one bundle)

Palm leaf; 41.3 x 4.1 c.m; Foll. 166; Lines: 7–8 on a page; Grantha; Good.

Presented in 1948–49 by Smt. V. Chellammal, wife of the late Prof. P. P. Subrahmanya Sastri, (Professor of Sanskrit, Presidency College, Madras and Curator of this Library) No. 2, Parthasarathi Koil St., Triplicane, Madras–5.

R. No. 8171.

शिवार्चनचन्द्रिका by अप्पय्यदीक्षित

ŚIVĀRCANACANDRIKĀ by Appayyadikṣita

Foll. 2 (a)—131 (b) ; 3400 granthas.

Begins on fol. 2(a). The other works herein are :—Śivārcanasūtram : fol. 132(a) and Siddhāntaśekharaḥ : fol. 163(a).

Same work as that described under **D.** No. 5531.

Complete.

End :

आश्रितरक्षाधुरन्धरमम्बिकया सह निजहृदयजलरुहकुहरे विहरमाणमानन्दसन्दोहमूर्तिपरमशिवमनवरतमन्तर्दृशावलोकयन्निष्टबन्धुभिस्सुखमासीत ॥

भजामि ज्वरकण्ठेशं मृत्युञ्जयपदाम्बुजम् ।
तदाश्रितो नखव्याजात् भक्तं जैवातृकस्सदा ॥

वेलूरधीशचिनबोम्मविभोरुदारे
चिकेच यानि च चिरादपि वर्धमानम् ? ।
अर्चाविधां पशुपतेरमराभिनन्द्यां
इत्थं समाचकलमीश्वरशासनेन ॥

सद्राजयोगविच चश्वरनाहताज्ञा ?
शक्तादिसारसमुदञ्चितदिव्यतेजाः ।
आवाहनक्रमकलानिपुणोऽतिवीरः
श्रीबोम्मभूप इव कश्शिवपूजकस्स्यात् ॥

करोतु ज्वरकण्ठेशः स्वकीयार्चनचन्द्रिकाम् ।
आकल्पस्थायिनीमेनां द्युस्थले चन्द्रिकामिव ॥

Colophon :

शिवार्चनचन्द्रिका समाप्ता ॥

Fol. 1 (a) contains some Ślokas relating to dreams and gives the title of this work ; fol. 1(b) is blank.

R. No. 8172.

शिवार्चनचन्द्रिकासूत्रम्—द्राविडविवरणसहितम् by अप्पय्यदीक्षितशिष्य
ŚIVĀRCANACANDRIKĀSŪTRAM with Notes in Tamil by a disciple of Appayyadīkṣita

Foll. 132 (a)—162(b) ; 1000 granthas.

Begins on fol. 132(a) of the manuscript described under the previous number.

Similar to the work described under the previous number.

Complete.

Beginning :

श्रीमद्दीक्षितचरणप्रोक्तशिवार्चनचन्द्रिकोक्तपूजासूत्रमादौ विलिख्यते, तस्यायं क्रमः—

सकलीकृत्य संस्कुर्यात् सामान्यार्घ्यं यथाविधि ।
शुद्धविद्याधिकं तत्त्वं शिवपूजानिकेतनम् ॥
तद्द्वारेऽनुत्तरं कुर्याद्द्वारपालार्चनं क्रमात् ।
विघ्नत्रयं विनिस्सार्य प्रविश्यास्त्रादिपूजनम् ॥
कृत्वा पूजोपकरणं सकलं सन्निधापयेत् ।
देवस्य दक्षिणे भागे पावकोत्तरदिङ्मुखः ॥
विहितासनमासाद्य पञ्चशुद्धिं समाचरेत् ।
ततोऽभिषिच्य देवेशं निवेश्य कमलासने ॥

End :

मलस्नानशोधनपाशच्छेदनप्रोक्षणताडनभेदनविघ्ननिवारणेषु हुंफट्छब्द आचमनादौ स्वधाशब्द इति च नियमः ॥

वेल्लूरधीशचिनबोम्मविभोरुदार—
कीर्ते .... चिरादपि वर्धमानाम् ।
अर्चाविधां पशुपतेरमराभिनन्द्यां
इत्थं समाचकलमीश्वरशासनेन ॥
सद्राजयोगनि ... च चरनाहताशा ?
शक्त्यादिसारसमुदञ्चितदिव्यतेजाः ।

आवाहनक्रमकलानिपुणोऽतिवीरः ।
श्रीबोम्मभूप इव कश्शिवपूजकस्स्यात ॥
करोतु ज्वरकण्ठेशः स्वकीयार्चनचन्द्रिकाम् ।
आकल्पस्थायिनीमेनां भुस्थले चन्द्रिकामिव ॥

R. No. 8173.

सिद्धान्तशेखरः by विश्वनाथ ।

SIDDHĀNTAŚEKHARAḤ by Viśvanātha

Foll. 163 (a)–165 (a) ; 50 granthas.

Begins on fol. 163(a) of the manuscript described under R. No. 8171.

Same work as that described under R. No. 5268 which however, contains a different portion of the work.

Contains Prāyaścittavidhi in Nimittakāṇḍa.

Incomplete.

Beginning :

श्रीविश्वनाथाचार्यविरचितदिव्यागमसारात्मकसिद्धान्तशेखरनिबन्धने नैमित्तिककाण्डे प्रायश्चित्तविधिर्दृश्यते ॥

तद्यथा—

कथ्यते विश्वनाथेन प्रायश्चित्तविधिः क्रमात् ।
शैवसिद्धान्तसंप्रोक्तं पू(र्वैराचा) [र्वाचा]र्यैर्यथोदितम् ॥
प्रायो विनाश इत्युक्तं चित्तं सन्धानमुच्यते ।
पुनर्नष्टस्य सन्धानं प्रायश्चित्तमिति स्मृतम् ॥
स्वस्वाचारस्य लोपेन मनुष्यो नरकं व्रजेत् ।
लुप्ताचारस्य शुद्ध्यर्थं प्रायश्चित्तं वदेद्गुरुः ॥

End :

तैः स्पृष्टं द्विगुणं लिङ्गे प्रजपेत् घोरशम्बरम् ।
वामदक्षिणमार्गस्थे स्पृष्टे लिङ्गेऽयुतं जपेत् ॥

पीठाच्च चालिते लिङ्गे निर्दोषञ्च जपेद्यदि ।
तदैव स्थापयेत्तत्र जपेल्लक्षमघोरकम् ॥

Fol. 165(b) is blank.

(R. Nos 8174—8175 (a) in one bundle.)

Palm leaf; 40.1 x 2.9, 2.7 c.m; Foll. 45; Lines: 5–8 on a page; Grantha; Much injured;

Presented in 1948-49 by Sri. K. Srinivasacharya, Lecturer in Sanskrit, Annamalai University.

R. No. 8174.

शृङ्गाररत्नाकरभाणः by सुन्दरताताचार्य

ŚṚṄGĀRARATNĀKARABHĀṆAḤ by Sundaratātācārya.

Foll. 2 (a)—33 (b); 650 granthas.

Begins on fol. 2(a); The other works herein are:—Tarkasaṅgrahaḥ; fol. 34 (a) and Vedāntācāryastutiḥ. fol. 45 (a).

A love-drama (one of the ten varieties of Rūpaka) written at the a instance of a certain king Rājagopāla, as stated in the introductory portion of this work.

Incomplete

Beginning:

शृङ्गारी विजयी भवत्विह चिरं शृङ्गारयोनेरपि
ख्यातस्नाततयैव वस्तुरसिकत्वात .... ।

.........वटमूलधामनि सुधासच्छायभोगीश्वरे
शेते श्रीकुचकुम्भलम्भनसदाशीतेन हस्तेन .... ॥

.... मामकतल्पकल्पमुदरं दृष्टं मया शैशवे
किं वा तादृशमेव संप्रति तदित्यस्ति स्पृहा वी [क्षितुम्] ।

.........वटपत्रशायिनि बलाद्विसंसयेत्यंशुकं
गोदायाः कुशलं ददातु भवतां सा .... ॥

[नान्द्यन्ते] सूत्रधारः (परितोऽवलोक्य सानन्दम्)

विविधरसविचित्रभाववेला सकुतुका .... ।
कथयति जगदीशितुर्विशाला .... ॥

(स्मृतिमभिनीय) अं .... कोत्सवः । (पुरस्तादवलोक्य, ससम्भ्रमाञ्जलिबन्धं) कथमपि सन्निहितावेव देवौ—

क्रीय.... ....श्रेयस्कृते त्रिजगतां परिपालयन्तौ ।
शृङ्गारदेवजनकौ जयतस्सराज........गोप........च गोदा ॥

(विमृश्य साश्चर्यम्)—

किमु सुकृतपरिणतमिदमघटितघटनास्वभावघटितं वा ।
श्रुतिगम्यं यत् .... गोचरी भवति ॥

(पार्श्वतो दृष्ट्वा) (सप्रत्यभिज्ञं) त इमे करतलबदरीकृतं रतिकान्तामान्तसिद्धान्त .... विदिताखिलभरततन्त्रविस्ताराः । (विमृश्य-सानन्दं) एषा गोष्ठी शृङ्गाररसतरङ्गितं कमपि नाट्यविशेषमवलोकितुमाविष्कृतभावौ देवौ सूचयति । अयमवसरोऽस्माकमधीतनवनवविद्यावैशारद्यविलोकनस्य (उपसृत्य सविनयं) भो भोस्सकलकलाकलापविदः सर्वे सभासदः ।

चिरन्तनजनुश्शताकलितपुण्यराशेः फलं
प्रसा[द]परिवर्धितस्वगुरुरङ्गचूडामणेः ।
प्रसीदत यथा यथा भरतदर्शने कौशलं
प्रदर्श्य भवताम्मुदे सफलम .... रा द्रुतम् ? ॥

(सबहुमानम्) किं ब्रूथ—

विख्यातं भुवि नान्यतन्त्रपदवीचातुर्यमाकर्ण्यते
तद्वीक्षाकुतुकेन (ब....प्रति) [संप्रति] वयं सर्वे सभामास्महे ।
कर्णानन्दनगद्यपद्यमधुरं नव्यं प्रयोगक्रमात्
किञ्चिद्रूपकमद्य दर्शय परं शृङ्गाररत्नाकरम् ॥ इति ।

परमनुगृहीतोऽस्मि । दिष्ट्या समुद्रं धिरध्यायेमिश्रवचनैः श्रृङ्गाररत्ना-
करनामधेयो भाणः (मञ्जु घन्)—

अमन्दमन्थानाद्रिक्षुभितकलशाम्भोनिधिभव-
रसमप्रमन्यप्रामृतझरधुनीभावचतुरः ।
अयं भाणस्मञ्जीवितकुसुम (भा)[ब]णः प्रभवति
प्रमोदानाधातुं सदसि भवतामत्रभवताम् ॥

पुनः किं ब्रूथ—कः पुनरस्य भाणस्य कर्तृभावमवलम्बेत इति ।
(स्मृतिमभिनीय) प्रसिद्धं हि—

पितामहपितामहो भवति यत्र जातः कुले
भिनत्ति मतपञ्चकं नरपतेर्गुरुर्जायते ।
यशो महदुपैत्यपि च कोटिकन्यार्पणात्
कलिं कुतयति श्रुतिस्मृतिस्ततिप्रतिज्ञापनात् ॥
तच्छ्रीशैलकुलाब्धिकौस्तुभमणिस्सर्वज्ञचूडामणिः
श्रीमान् देवशिखामणिर्गुणगणैरिन्धे स गुर्वग्रणीः ।
तातो यस्य वनाद्रिनायकगुरुर्यद्वाजपेयाध्वर-
च्छत्रश्रीः किल धिक्करोति सुतरां राकासुधांशुप्रभाम् ॥
तस्यात्मजस्सुन्दरतातयार्यस्त्रय्यन्तयुग्मार्थधुरीणवर्यः ।
श्रृङ्गाररत्नाकरनामधेयं भाणं बभाण स्मरभागधेयी ॥

पुनरपि किं ब्रूथ? तस्य कवेरुभयनिगमशिखरनिरन्तरविचिन्तन-
प्रवीणान्तःकरणस्य कथमत्र प्रवृत्तिरिति ? सत्यम्, सकलकुलसमयसाधारणे
यया कयापि प्रक्रियया स्ववैदग्ध्यप्रदर्शने का विमतिः । अथापि तेनैव
प्रतिपादितं प्रारम्भे राजगोपालदिव्यनिदेशाधीनैतत्प्रवृत्तिरिति । तथाहि-इह पुरि
दिव्यवारवनितासवयोरसिका इ विहरामि यद्रसिकशेखर एव भवन्नहम् । तदनुपमं
प्रबन्धय रसोत्तमहृद्यमिति स्वयं स्वप्नदशागतप्रभुनिदेशादिदमारेभे इति ।

End :

अस्मदागमनमपि न जानाति मण्डनकौशलविलोकनविलोललोचनेन
मदनप्रियेण सबहुमानमुपगूढा रत्नमञ्जरी (निर्वर्ण्य)

विलिख्य दयितोरसि प्रकटचित्रपत्रावलीं
स्वयं मृगमदद्रवैरकलितान्यशिल्पादरम् ।
सकृत्समुपगूहनस्फुटतरप्रसक्ताखिल-
प्रकारयुतरेखिकावलिपरिष्कृतोरोरुहा ॥

तदियमलोकसाधारणप्रसाधनचातुरीधुरीणा, अयमपि तथैव । यथेष्टं रमताम् ॥

Fol. 1 contains some verses of Hayagrīvastotra.

R. No. 8175.

तर्कसङ्ग्रहः by अन्नम्भट्ट

TARKASAṄGRAHAḤ by Annambhaṭṭa

Foll. 34 (a)—44 (b) ; 200 granthas.

Begins on fol. 34 (a) of the manuscript described under the previous number.

Same work as that described under Nos. D. 4143 and R. 210. Incomplete

End :

तावयुतसिद्धौ । यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति । अनादिस्सान्तः प्रागभावः । यथा उत्पत्तेः पूर्वं कारणे कार्यस्य । सादिरनन्तः प्रध्वंसः । उत्पत्त्यनन्तरं कार्ये ।

R. No. 8175. (a)

वेदान्ताचार्यस्तुतिः

VEDĀNTĀCĀRYASTUTIḤ

Fol. 45 ; 10 granthas.

Begins on fol. 45 (a) of the manuscript described under R. No. 8174.

Contains 10 verses written in praise of Śrī Vedāntācārya. Complete.

Beginning :

त्रयीचूडागुरो स्वामिन् कृपाम्भोराशिना त्वया ।
विज्ञापनं मामकीनं श्रोतव्यं श्रितवत्सल ॥ १ ॥

त्रय्यन्त .... जुषा सताम् ।
स्वयं मयि सदा भूयादनुग्रहपरम्परा ॥ २ ॥

श्रीसंयमीन्द्रसिद्धान्तनित्यरक्षैकदीक्षितम् ।
नियतं कुरु दास .... ॥ ३ ॥

ज्ञानभक्त्यादिसत्संपत्प्रदायिन्यानुकम्पया ।
स्यादसाविति वीक्षस्व वेदान्ताचार्यवर्य माम् ॥ ४ ॥

End :

वेदान्ताचार्यपादाब्जभक्तिरत्नाकरो भवेत् ।
जयति श्रुतिचूडार्यःश्रीमानद्भुतविग्रहः ॥
[वादिद्वि] पशिरोभङ्गपञ्चाननपराक्रमः ।
श्रीमान् वेङ्कटनाथार्यश्चिरं विजयतां भुवि ॥ १० ॥

(R. Nos. 8176—8179 in one bundle)

Palm leaf; 42.4 x 3.2 and 41.8 x 3.1 c.m.; Foll. 70; Lines: 7–9 on a page; Injured.

Presented in 1948–49 by Sri K. Srinivasacharya Lecturer in Sanskrit, Annamalai University.

R. No. 8176.

वसन्ताभरणभाणः by श्रीनिवास ।

VASANTĀBHARAṆABHĀṆAḤ by Śrīnivāsa

Foll. 2 (a)–25 (b); 900 granthas.

Begins on fol. 2(a); The other works herein are :—

Anaṅgajīvanabhāṇaḥ: fol. 26 (a); Vedāntācāryavijaya-campūḥ: fol. 58(a) and Mukundānandabhāṇaḥ: fol. 69(a).

This love-drama is said to have been composed for being enacted during a festival of Lord Raṅganātha of Srirangam.

Fol. 1 (a) gives the title of this work; 1(b) is blank.

Beginning :

.... पुमान् ।
पारम्यं प्रमदाधीनं पुंसामिति वदन्निव ॥ १ ॥

किञ्च :—

[त्रयो]देवास्सर्गस्थितिलयकृतस्सर्वजगतां
[वहन्तो जिह्वायामुरसि वपुषि स्वदयिताम्] ।
.... श्शेषभुवनैः ?
स कन्दर्पश्श्रेयस्सुवहु भवतां संजनयताम् ॥ २ ॥

नान्द्यन्ते सूत्रधारः - किञ्च—

इक्षुर्यस्य धनुर्द्विरेफपटली मौर्वी प्र ....
....
... ... क्षनिकरैर्बलं परभृतो वन्दी वसन्तस्सखा
निश्शेषं भुवनं विजय्यमसमश्शूरस्य जेजीयताम् ॥ ३ ॥

(इति पुष्पाञ्जलिं विकीर्य)--नेपथ्याभिमुखं निरीक्ष्य).... ....
.... भाव एषोऽस्मि ।

सूत्र—आदिष्टोऽस्मि, निखिलसुरासुरमकुटतटोपलालितचरणारविन्दरेणुनिकरस्य निरवधिकभक्तिनम्रनिटिलाक्ष .... खरस्य निरुपमजङ्घारुचिनिराकृतनीलमणिनिषङ्गगर्वाङ्कुरस्य निरीक्षकजननयनरञ्जनजानुमुकुरस्यनित्यतारुण्यनिर्जित ... . रुयुगलीरुचिमुकुलीकृतकदलीतरुडम्बरस्य निक्षिप्तसुवर्णनिर्व्रणनिजाम्बरस्य सकलभुवननिदाननलिनजननभवनगम्भीरस्य .... विशालवक्षस्स्थलविलसितलक्ष्मीचरणलाक्षारसद्विगुणितकौस्तुभकान्तिकिम्मीरितवैजयन्तीबन्धुरस्य रेखात्रयरमणीयकं .... सुवृत्तमांसलभुजस्तम्भस्य कोमलारुणकरतलकदर्थितकिसलयदम्भस्य महार्घरत्नमनोहरमकरकुण्डल .... कसुधाकृतसुधाकरमण्डलस्य कुन्दकुसुमबृन्दसुन्दरमन्दहासस्य चारुतमचम्पकसूनशोभासम्पदपहासकरनासस्य मृग .... कूटस्य भक्तजनभावुकदायकस्य भगवतः श्रीरङ्गनायकस्य सुरभिसमयसंतन्यमानमहोत्सवसिसेविषासमायातैस्सुधारस.... .... कर्कशतर्कवादाहवमोदान्वितदुर्वादिगणदुर्वारगर्वाम्बुजवि-

.... गन्धसिन्धुरैः, अनुपथि वि .... चातुर्यैरन्यो-
न्यसौहार्दधन्यैरमीभिरभिज्ञमूर्धन्यैः ॥

पारिपार्श्विकः (सहर्षोत्सुक्यं)

... ... सरसभावसमग्रगुणं नवम् ।
अखिलहृद्यमवद्यविवर्जितं किमपि रूपय रूपकमुज्ज्वलम् ॥

* * *

सूत्र—श्रूयताम्—अस्ति खलु—

श्रीवत्सान्वयसागरामरतरोश्श्रीशैलनाम्नो गुरो-
स्सूनुस्सूरिशिखामणिर्गुणनिधिश्श्रीरामचन्द्राह्वयः ।
श्रुत्वा यस्य मु .... कोविदैः
वाल्मीकिस्वकु.... ....लौ कथयितुं ह्यस्यात्मना भूत्? ॥ ८ ॥

इति । तस्य तनयः श्रीनिवासो नाम ।

पारि–(सवितर्कं) किं स एवासौ,

सद्वृत्तस्य खनिश्श्रुतस्य जलधिः .... बुज-
द्वन्द्वस्यन्दिमरन्दनु .... नोभृङ्गस्सतां सम्मतः ।
भारद्वाजकुलस्य भूषणमणिश्श्रीरङ्गनाथो गुरु-
श्शान्तिक्षान्तिदयादिसद्गुणगणश्रीर्यस्य मातामहः ॥ ९ ॥

अथ ... .. नन्वं भाणं वसन्ताभरणं बभाण ।
तेनैन चेतो विदुषाममीषां सन्तोषयामस्सुयशश्च याम ॥

End :

तथापीदमस्तु भरतवाक्यम्—

जीयादाज्ञा स्मरस्य त्रिजगति सुदृशां जृम्भतां यौवनश्रीः
यायासुः पण्डितेन्द्रा रसभृतकविता तान्नृपा लालयन्ताम् ।
भूयात् काले सुवृष्टिर्भवतु च वसुधा सर्वतस्सान्द्रसस्या
पायासुस्तां नृपालाः प्रचुरनयगुणास्सन्तु सन्तस्समृद्धाः ॥ २२२ ॥

वाग्गुम्फा यस्य स(न्धा)[न्ध्या] समयपटुनटद्वामदेवोत्तमाङ्गो-
तुङ्गद्गङ्गातरङ्गप्रबलकलकलारम्भसम्भावनीयाः ।
तस्माद्गोपालसूरेरनवधिककृपालब्धपाण्डित्यसम्पत्
प्रख्यातः श्रीनिवासस्समतनुत सतामाज्ञया भाणवर्यम् ॥ २२३ ॥

Colophon :

वसन्ताभरणं नाम भाणस्सम्पूर्णः ॥

R. No. 8177.

अनङ्गजीवनभाणः by वरदाचार्य

ANAṄGAJĪVANABHĀṆAḤ by Varadācārya

Foll. 26 (a)—54 (a) ; 700 granthas.

Begins on fol. 26 (a) of the manuscript described under R. No. 8176.

Same work as that described under D. No. 12429.

Complete.

Fol. 54(b) contains verses relating to Aruṇa ; fol. 55 is blank and foll. 56 and 57 contain some portion from the beginning of the Nalodayavyākhyā.

R. No. 8178

वेदान्ताचार्यविजयचम्पुः by वेदान्ताचार्य

VEDĀNTĀCĀRYAVIJAYACAMPUḤ by Vedāntācārya

Foll. 58 (b)–68 (b) ; 300 granthas.

Begins on fol. 58 (a) of the manuscript described under R. No. 8176.

Same work as that described under D. No. 12365.

Contains only the first Stabaka and a portion of the beginning of the second Stabaka.

Incomplete.

End :

तर्कध्वन्यबुधावलीमद(सु)[सु]धापाथोधिमुष्टिन्धयान्
तत्ताद्दक्षयतीन्द्रसूक्तिमहिलालङ्कारमुक्तासरान् ।
वाग्गुम्फा ....

Foll. 68 (b) is blank.

R. No. 8179.

मुकुन्दानन्दभाणः by काशीपति

MUKUNDĀNANDABHĀṆAḤ by Kāśīpati

Foll. 69 (a)–70 (*b*) ; 60 granthas.

Begins on fol. 69 (a) of the manuscript described under R. No. 8176.

Same work as that described under D. No. 12613.

Contains only a small portion in the beginning.

Incomplete.

End :

मन्द्रानिलैरिति मनोहरपल्लवाग्रैः
वाकन्दवीरुदियमाह्वयतीव रागात् ।
प्रत्युत्तरं परभृतो विदिशन्निवास्यैः
कूजत्कुहूरिति समेति सपक्षपातम् ॥

R. No. 8180.

Palm leaf; 38.3x3.1 c.m; Foll. 33; Lines: 6–8. on a page; Grantha; Injured; 725 granthas.

Presented in 1948-49 by Sri K. Srinivasacharya, Lecturer in Sanskrit, Annamalai University.

सुभद्रापरिणयम् by नल्लाकवि

SUBHADRĀPARIṆAYAM by Nallākavi.

Foll. 2(a)–28(b).

Same work as that described under R. No. 788.

Fol. 1 (a) gives the title of this work. Foll. 1 (b), 29, 30 and 31 are blank and 32 and 33 contain some domestic accounts.

Complete.

(R. Nos. 8181 and 8182 in one bundle)

Srītāla; 48.0x6. and 47.7x5.7 c.m; Foll. 251; Lines: 16-20 on a page; Grantha; Slightly injured.

Presented in 1948-49 by Sri Sivaramakrishna Sastrigal of the Sanskrit Department, Annamalai University.

R. No. 8181.

सूतसंहिताव्याख्या—तात्पर्यदीपिका by माधवाचार्य

